यथा॥ब्रह्मरंध्रेसितेपद्मेसहस्रदलशोभिते॥श्रीगुरुंपरमा
त्मानंव्याख्यामुद्राल[illegible]सत्करं॥ १ ॥द्विनेत्रंद्विभुजंस्मेरंकर्पू
रशाकलोज्वलं॥प[illegible]सादात्यर्थायेदरिवलसिद्धिदं॥
२ इतिध्यात्वामानसेकरकारैः पूजयित्वा॥अज्ञानतिमिरां
धस्यज्ञानांजनशलाकया॥चक्षुरुन्मीलितंयेनतस्मैश्रीगु
रवेनमः॥ १ ॥नमोस्तुगुरवेतस्मैगायत्रीरूपिणेसदा॥
यस्यवाग्मृतंहंतिविषंसंसारसंज्ञकं॥इत्यनेनप्रणामेत॥

143284



गायत्री ततस्तच्चरणारविंदनिस्यंदमकरंदधाराभिरात्मदेहमभिषिक्तं
२ भावयेत् ततस्तत्रैवश्रीगुरोराज्ञमस्वेतिविसर्जयेदितिगुरुध्या
नं ततोमूलमंत्रेणप्राणायामत्रयंकुर्यात् तद्यथा सप्राणा
यामः पूरककुंभकरेचकात्मकः तथाचोक्तं अंगत्र
यात्मकः पूररेचककुंभकरिति तत्स्वरूपमाह विश्वामित्रसं
हितायां कनिष्ठानामिकांगुष्ठैर्यंनासापुटधारणं प्राणाया
मःसविज्ञेयस्तर्जनीमध्यमांविना॥ १ ॥दक्षिणेरेचकंकु

र्याद्वामेनापूरितोदरः कुंभकेनत्रिराहृत्याप्राणायामस्यल
क्षणं॥ २ ॥दशप्रणवसंयुक्तोगायत्रीशिरसासह त्रिःप
ठेदायतःप्राणःप्राणायामःसउच्यते॥ ३ ॥उच्चारयन्प्रण
वव्याहृतीनेकेनमंत्रवित् [illegible]दरंपूरयित्वातुवायुनारद्मास्थितः
४ ॥प्राणायामोत्त[illegible]रकोदेहपूरकः पिधायसर्वगात्रा
णिश्वासोच्छ्वासवि[illegible]५ ॥संपूर्णकुंभवन्निश्चलप्राणा
यामःसकुंभकः मुं[illegible]धायुतथैकेनश्वासेनानेनमंत्रवित् ६

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

गायत्र्यप० निश्वासयोगयुक्तं [illegible]यं बाह्यनरेचयेत् रेचकस्त्वेषसंप्रोक्तः
प्राणायामोनसंशय[illegible]॥सचमूलेनतदशंकोप्रणवेन
कार्यः प्राणायाम[illegible]मूलेनप्रणवेनवेति तत्रैवोक्त्वा
त् तत्क्रममाह वासव[illegible]हृतायां आसनेसम्यगासीनोवामे
नापूर्यचोदरं कुंभकेना[illegible]रादृत्यादक्षिणेननुरेचयेत् तद्यथा
विहितपद्मासनःस्वस्तिकासनोवामूलाधारार्पितचित्तवृत्तिः॥ २
सावित्रीप्रणवंवासमुच्चारयन् इडयावामनाड्याशनैःशनैर्वायु

मापूर्यमूलाधारप्रपद्यांगुष्ठकनिष्ठिकाभिर्नासापुटौविधृत्य
दशप्रणवसंयुक्तांगायत्रींदशवारंप्रणवंवाजपन्तेवायुंतंभयि
त्वापिंगलयादक्षिणनाड्याशनैःशनैस्तंवायुंरेचयेदित्येकःप्रा
णायामः॥पुनस्तथैवपिंगलयावायुंशनैःशनैःसमाकृष्यतथै
वकुंभयित्वातथैवेडयारेचयेदित्यन्यः एवंविपरीत्यन यत्नेव
संत्यजेत्येनपूरयेद्वारयेन्नतः रेचयेच्चततोन्येनशनैरेवंपुनः
पुनरितियोगयुक्त्याभ्यासेनत्रीन्प्राणायामान्विधायस्वशरीरं

गाय॰प॰ विश्वासयोगयुक्तो [illegible]त्यनरेचयेत् रेचकस्तेवसप्रोक्तः
२ प्राणायामोनसंशयः [illegible]॥सचमूलेनतदशंकोप्रणवेन
कार्यः प्राणायाम[illegible]मूलेनप्रणवेनवेति तत्रैवोक्त्वा
त् तत्क्रममाह पा[illegible]तायां जानुनेसम्यगासीनोवामे
नापूर्यचोदरं कुंभकेना[illegible]दृत्यादक्षिणेननुरेचयेत् तद्यथा
विहितपद्मासनः स्वस्तिकासनोवामूलाधारार्पितचित्तदृनिः॥ २
सावित्रीप्रणवंवासमुच्चारयन् इडयावामनाड्याशनैः शनैर्वायु

मापूर्यमूलाधारप्रपद्यांगुष्ठकनिष्ठिकाभिर्नासापुटौविधृत्य
दशप्रणवसंयुक्तांगायत्रींदशवारंप्रणवंवाजपन्तेवायुंस्तंभयि
त्वापिंगलयादक्षिणनाड्याशनैः शनैस्तंवायुंरेचयेदित्येकः प्रा
णायामः॥पुनस्तथैवपिंगलयावायुंशनैः शनैःसमाकृष्यतथै
वकुंभयित्वातथैवेडयारेचयेदित्यन्यः एवंवैपरीत्येन यत्नेव
संत्यजेत्येनपूरयेद्धारयेन्नतः रेचयेच्चततोन्येनशनैरवंपुनः
पुनरितियोगयुक्ताभ्यासेनत्रीन्प्राणायामान्विधायस्वशरीरं

7
1971

निर्मलंभावयेत् इत्येवंसर्वत्रकर्मादौकर्मांतेच तथाचोक्तं॥
ततःशास्त्रोक्तमार्गेणप्राणायामंसमाचरेत् त्रिषट्द्वादशवा
रंवापुरतःपरतोजपादिति तथाशुचिःप्राणायामान्प्रपावस
हितान्षोडशवशीप्रभातेसायंचप्रतिदिवसमेवंवितनुते॥
द्विजोयस्तंभ्रूणप्रहरणकृदंधोभिकलितंपुनंत्येतेमासादिह्
डुरितत्लोघदहनाः॥ १ ॥त्रायंत्यमीषड्डिरपीहमासोजन्मो ४
तरापार्जितपापपुंजान्संवत्सराद्रुद्रपदंतदेकंप्रकाशयंत्येव

यदस्त्युदारव्यं॥ २ ॥इतिविश्वामित्रसंहितायां॥प्रणवमात्रा
तुतन्मंत्रोच्चारणेपलक्षितःकालविशेषः जानुंप्रदक्षिणी
कृत्यनडुतंनविलंबितं क्रियतेचांगुलिस्फोटःसामात्रापरि
कीर्तितत्युक्तंवसिष्ठसंहितायां इतिप्राणायामविधिः अथगा
यत्रीयोगध्यानंकुर्यात् ततोमूलाधोरत्रिकोणंकामंबालार्क
वर्णंसत्वरजस्तमोगुणाकांतंबिंदुंसंचिंत्यतदूर्ध्वेकुंडलिनीश
क्तिंचिद्रूपांतडिदाभांमृणालांतरालतंतुतुल्यांप्रसुप्तभुजगका

रांसार्धात्रिवलयेनस्थितांमनोदंडेनोत्थाप्य ॐकारेणगुरू
पदिष्टनविधिनासुषुम्नामार्गेणमूलाधारस्वाधिष्ठानमणिपू
रकानाहतविशुद्धाज्ञाख्यषट्चक्रभेदक्रमेणशिरस्थितांधोमु
खसहस्त्रदलकमलंनीत्वातत्रस्थितेचंद्रमंडलाद्विगलितामृत
धारयारक्तयावर्णमय्यातांकुंडलिनींसंतर्प्यतांविशुध्यादिक्र
मेणपुनर्मूलाधारंनयेत् इतियोगंविभाव्यमंत्रयोगंविधा ५
त् तद्यथा मूलाधारादिब्रह्मरंध्रांतंमूलविद्यांगायत्रीउद्यादि

नकराभांविभाव्यतदात्मानमात्मानंमन्यतेतिमंत्रयोगः ननो
हृदयकमलेवक्ष्यमाणध्यानेनयथोक्तरूपांसावित्रींभगव
तींध्यात्वातत्प्रभापाटलमग्रेवक्ष्यमाणक्रमेणगायत्र्याऋष्या
दिन्यासपूर्वकंमानसंपूजयित्वामंत्रगुरुदेवतात्मकत्वेनात्मा
नंभावयन्यथाशक्तिगायत्रीजपसमर्प्यस्तुत्वानत्वादेवीमाज्ञां
प्रार्थयेत् त्रैलोक्यचैतन्यमरित्रिशक्तेवागीश्वरित्वच्चरणाश्र
येव प्रातःसमुत्थायतवप्रियार्थंसंसारयात्रामनुवर्तयिष्ये मा

9
1971

गा॰प॰ नामिधर्मनचमेप्रवृत्तिर्जानाम्यधर्म्मनचमेनिवृत्तिः त्वयाहृ
६५ षीकेणहृदिस्थयाहंयथानियुक्तोस्मितथाकरोमि इत्याशीःप्रा
र्थ्य प्रातःप्रभृतिसायांतंसायादिप्रातरंततः यत्करोमिजगद्धो
नेतदस्कृतवपूजनं इत्यनेनसर्वंसवित्रूपिण्येदेव्येगायत्र्ये
समर्प्यदेवतारूपोभूत्वाभूमिंप्रार्थयेत् तद्यथा समुद्रमेरव
लेदेविपर्वतस्तनमंडले विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्व ६५
मे इत्यनेनप्रार्थ्यश्वासानुसारेणभूमौपादंनिधायगृहाद्बहिर्

पराजिता यांदिशिमलमूत्रोत्सर्गार्थंगच्छेत् इतिप्रातर्निष्क्रमण 11/1971
विधिः॥ ॥ततःस्मृत्युक्तविधिनामलमूत्रोत्सर्गंशौचाचमनं
कृत्वातांत्रिकमंत्रेणदंतधावनंकुर्यात् तद्यथा स्मृत्युक्तविधि
नानिषिद्धेतरकाष्ठेनतृणपर्णादिभिर्वाप्राङ्मुखोवाप्युदङ्मुखो
वामौनी आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ब्रह्मप्रज्ञांचमे
धांचत्वंनोदेहिवनस्पते इतिस्मृत्युक्तमंत्रपुरःसरं कूंकामेद
वायसर्वजनप्रियायनमः इत्यनेनकाष्ठमभिमंत्र्यतेनचप्राद्

गा·प· क्षिप्येनदंतधावनंविधायतत्काष्ठंप्रक्षाल्यभुवौदेशेअग्रतस्त्य
७ जेत् ततोमूलेनमुखंप्रक्षाल्यद्विराचमनंकुर्यात् तद्यथा द्वौ
चोरितयापानेस्पृष्टास्पृष्टेचचर्वणे पौराणाचमनंकुर्यान्नामभिः
केशवादिभिः॥ १ ॥संध्यायांकर्मकालेचमृतेराचमनंसवेत्
ब्रह्मयज्ञेतुवैकुर्यादंग्नामपूर्वकंद्विजः॥ २ ॥गायत्रीमंत्रज
प्यादौदेव्याःपादैःपृथक्पृथक् पांचभौतिकमंत्रेणभूतशुध्यौ ७
समीरितं॥ ३ ॥प्राणप्रतिष्ठासमंयत्यात्मतत्वादिभिःपिबेत्

तथैवमातृकान्यासेसर्वकर्मसुमूलतः॥ ४ ॥गोकर्णाकृति 13/1971
हस्तेनमाषमग्नजलंपिबेत् तन्यूनमधिकंपीत्वापुनराचमनंम
वेत् ५ अंगुष्ठाग्रंसमाकुंच्यमध्यमामध्यपर्वणि गोकर्णंतद्वि
विज्ञेयंसर्वेषाचमनेषिह॥ ६ ॥संहतांगुलिहस्तेनगृहीत्वाचां
बुवीक्षितं सुक्ष्मंगुष्ठंकनिष्ठंचत्रिःपिबेद्ब्रह्मतीर्थतः॥ ७ ॥शी
तलंनिर्मलंचांबुमधुरंक्षारवर्जितं ग्राह्यमाचमनेस्नानेदेवैपैत्र्ये
चकर्मणि॥ ८ ॥तत्रपुराणाचमं केशवादित्रिभिःपीत्वाद्वाभ्यां

प्रक्षालयेत्करौ गंडौष्ठौसंमृजेद्द्विर्द्विरेकैकंपाणिपाद्योः॥ ९
मूर्ध्निचैकंवचस्यैकंनासाक्ष्णोःकर्णयोर्द्वयोः नाभौत्वदिशिर
स्यंसस्पृशेद्बाहुहृदयंक्रमात् १० ॐकारपूर्वकंनामडेंतंसंबो
धनंतुवा चतुर्विंशतिसंख्यैकैर्नामभिःकेशवादिभिः॥ ११ ॥
स्वाहांतंप्राशयेद्वारिनमेतंस्पर्शयेदथ प्रक्षाल्यहस्तौपीत्वाथस
कृदोष्ठावतःपरं॥ १२ ॥संहतांगुलिमूलेनद्विःप्रमृज्यान्ततोमु ८
खं स्पृष्ट्वाकरावभिमृशेत्संहतांगुलिभिर्जलं अद्भिर्वामकरंसिं

च्यताभिःपादौचसंस्पृशेत् अंगुल्यग्रैस्त्रिभिर्मध्येरास्योर्ध्वंस 13 A
मुपस्पृशेत्॥ १४ ॥मध्यमध्येजलंस्पृष्ट्वास्पृशेन्नासादिका 1971
क्रमात् अंगुष्ठेनप्रदेशिन्याघ्राणंचैवमुपस्पृशेत्॥ १५ ॥अं
गुष्ठानामिकाभ्यांचचक्षुःश्रोत्रंपुनःपुनः अंगुष्ठोपकनिष्ठिका
भ्यांनाभिंपश्चादुपस्पृशेत्॥ १६ ॥तलेनहृदयंस्पृष्ट्वास्पृशेद्दं
गुलिभिःशिरः अंगुल्यग्रैर्दक्षिणादिबाहुमूलद्वयंस्पृशेत्॥ १७
अनेनविधिनाविप्रःकुर्यादाचमनंसदा अथमंत्राचमनं दे

व्यापादैस्त्रिभिःपीत्वाअङ्गैर्नवभिस्पृशेत् सप्तव्याहृतिभि
श्चैवशिरोमंत्रैस्पृशेत्क्रमात्॥ १९ ॥इत्याचम्यशिखाबंधंकु
र्यात् सचोक्तोविश्वामित्रसंहितायां शिखायांब्रह्मग्रंथिरुक्त
श्रोक्तासंध्यादिकर्मसु रुद्रग्रंथिस्तथाशैवेकर्मणिद्विजसत्त
म॥ २० ॥वैष्णवेविष्णुग्रथनमुक्तंवैप्रेतकर्मणि स्वशाखोक्ता
शिखाधार्योऽक्तस्थानेद्विजोत्तमैः॥ २१ ॥विट्शूद्रैःक्षत्रियैरे
कानधार्यायतिभिःसदा शिखाधस्तात्परावृत्यवामतोदक्षिणे

नतु॥ २२ ॥ग्रंथिच्छित्त्वाग्रमावेश्यब्रह्मग्रंथिःप्रकीर्तिता॥के
वलं बंधनंशोधीद्विरावृत्तिस्तुवैष्णवी॥ २३ ॥गुरूपदिष्टविधि
नाशिखाबंधंसमाचरेत् शिखाबंधंविनाकर्मनसिध्यतिफ
लार्थिनः॥ २४ ॥प्राणायामंविनाजाप्यंबीजगुप्तंयथोदितं॥
वृथासनार्द्रतेध्यानंकुतगुप्तंकृतंचयत्॥ २५ ॥तस्मात्सर्वप्र
यत्नेनफलार्थैःसाधकोत्तमः आसनेप्राणसंरोधंशिखाबं
धंसमाचरेत्॥ २६ ॥इतिवसिष्ठसंहितावचनात् मेद्राद्युप

15/1971

परिनिक्षिप्यसम्यगुप्ततथोपरि गुल्फांतरंचनिक्षिप्यसिद्धा
सनमुदीरितं॥ १ ॥उत्तानौचरणौकृत्वाऊरूसंस्थौप्रय
त्नतः ऊरूमध्येतथोत्तानौपाणिपद्मासनंत्विदं॥ २ ॥जा
नुर्वोरंतरेसम्यक्कृत्वापादतलेउभे॥ ऋजुकायःसमासीनः
स्वस्तिकंतत्प्रचक्षते॥ ३ ॥इतिप्रसंगतआसनलक्षणं॥
एवंद्विराचम्यशुचिर्देव्यात्मास्नानायनद्यादौगच्छेत्॥तत्रं १०
गास्त्रमंत्रेणतीरंप्रक्षाल्यस्नानीयंस्थापयित्वामलस्नानंवि

15A
1971

धायस्वशास्त्रोक्तमार्गेणवैदिकस्नानंपौराणिकंवाकृत्वात्तां
त्रिकमाचरेत् इतिवसिष्ठसंहितावचनात्॥अस्त्रोगमूल
विद्याभिःस्नानंकुर्याद्यथाविधिः तद्यथा नाभिमात्रोदकेस्थि
त्वागुर्वादिवंदनपूर्वकंमूलमंत्रेणप्राणायामत्रयंकृत्वामूल
मंत्रस्यऋष्यादिकरषडंगन्यासंविधायगायत्रीरूपमात्मा
नंध्यात्वापुरतोमूलमंत्रेणचतुर्हस्तमितंचतुरस्रंतीर्थंप्रकल्प्य
तत्रगंगेचयमुनेचैवगोदावरिसरस्वति॥नर्मदेसिंधुकावेरिज

गाय० ११ लेस्मिन्संनिधंकुरु॥इत्यनेनतीर्थमंत्रेणांकुशमुद्रयासूर्य
मंडलात्तत्रतीर्थमावाह्यवमित्यमृतबीजनधेनुमुद्रयामृतीक
त्यकवचमंत्रेणावगुंठ्यास्त्रमंत्रेणछोटिकादिभिःसंरक्ष्यचक्र
मुद्रांप्रदर्श्यगायत्र्याष्टधाभिमंत्र्यतदुकेवक्ष्यमाणप्रकारेण
गायत्रीयंत्रंविभाव्यतदुपरियथोक्तरूपांसावित्रीध्यात्वावाह
नादिकंकृत्वाजलेनैवपूजयित्वामंस्नाप्यतच्चरणसृतंतीर्थंम ११
खांगुष्ठादिभिरंगुलीभिःश्रोत्रादिद्वारापिविधृत्यमनसागाय

त्रीमुच्चरन्देव्याश्चरणतलेस्मिंस्तीर्थंजलेत्रिर्निमज्जेत् ततो
गायत्र्यैवद्वादशधात्रिधावाजलांजलीन्स्वशिरसिदद्यात् त
तोमूलेनैवत्रिराचम्यमूलेनैवदेवीस्त्रिस्तर्पयित्वासंहारमुद्र
याक्षमस्वेतिदेवीत्रदिविसृज्यतीर्थानिसूर्यमंडलेविसृजेदि
तिगायत्रीस्नानविधिः ततोजलादुत्तीर्यमूलाभिमंत्रितेधौते
वाससीपरिधायमूलेनैवपूर्वोक्तलक्षणेनशिखांबध्वापूर्ववद्
द्विराचम्यप्राणायामत्रयंकृत्वातीर्थादिपवित्रमृदादिनाम्बेतो

धर्युद्धकंविधायतदुपरिविहितभस्मनात्रिपुंड्रंयथास्थानंकुर्यात्
श्वेतमृत्स्नोर्ध्वपुंड्रंचभसितेनत्रिपुंड्रकं क्रमेणविप्रःकुर्वीतचंद
नेनयथारुचि नीर्यङ्मदाचोर्ध्वपुंड्रंनकुर्याद्भस्मनाद्विजः यदि
मोहात्मकुर्वीतनरकायोपपद्यते॥ २ ॥आदौमृद्धारणंकुर्या
द्भस्मनाचततःपरं चंदनंस्वेच्छयाधार्यंतीर्यगुर्ध्वंचवर्तुलं॥ ३ ॥
संध्याध्यानंतपोहोमंस्वाध्यायोदेवतार्चनं ऊर्ध्वपुंड्रंविनाकर्म १२
निष्फलंस्यादितिस्मृतिः॥ ४ ॥ब्रह्मचारीगृहस्थोवावानप्र

स्थोयतिस्तथा विनाभस्मत्रिपुंड्रेणनतिष्ठेज्ज्ञानवान्द्विजः॥
५ ॥इतिविश्वामित्रसंहितायां एवंत्रिपुंड्रोर्ध्वपुंड्रान्यतरंवामू
लमंत्रेणसप्तधाभिमंत्रितेनतिलकंविधायवैदिकींसंध्यांस्व
शाखोक्तमार्गेणविधायगायत्रीजपंकुर्यात् तत्रसंध्याकालः
उदयात्प्राक्तनीसंध्याघटिकात्रयमुच्यते सायंसंध्यात्रिघटि
काअस्ताद्उपरिभास्वतः॥ १ ॥उत्तमातारकोपेतामध्यमालु
प्ततारका अधमासूर्यसंयुक्ताप्रातःसंध्यात्रिधामता॥ २ ॥

17/1971

उत्तमासूर्यसंयुक्तामध्यमालुप्तभास्करा॥अधमाऋक्षसंयु
क्तासायंसंध्यात्रिधामता॥ ३ ॥अहोरात्रस्ययाःसंधिःसूर्यन
क्षत्रवर्जितः सातुसंध्यासमाख्यातामुनिभिस्तत्वदर्शिभिः४
संध्योत्तमातृतीयेंशेपंचधांशेदिनस्यतु माध्याह्निकीतदूर्ध्व
वापूर्ववास्याद्द्वित्रिवह्नि॥ ५ ॥संध्याकालेतुसंप्राप्तसंध्योनैवा
त्युपासते जीवमानेभवेच्छूद्रोमृतःश्वात्यभिजायते॥ ६ ॥का १३
लेतुवंदितासंध्यास्वर्गमोक्षप्रदायिनी अकालेवंदितासंध्या

साचसंध्यावधूरिव॥ ७ ॥काललोपेप्रायश्चित्तं संध्याका
लेव्यतिक्रांतेस्नात्वाचम्ययथाविधिः जपेदष्टोत्तरंदेवीततःसं
ध्यांसमाचरेत्॥ ८ ॥जमदग्निः एकाहंसमतिक्रम्यप्रमा
दादकृतंयदि अहोरात्रोषितोभूत्वागायत्र्याश्चायुतंजपेत्।
९ राष्ट्रभंगेनृपक्षोभेरोगार्तोसूतकेपिवा संध्यावंदनवि
च्छित्तिर्नदोषायकथंचन १० विद्वत्संगेविवादेचयज्ञेभू
पतिदर्शने संध्यावंदनलोपोयंनदोषोमुनिभिःस्मृतः॥

११ ॥पूर्ववदार्ध्वचम्याधिकशीविरूपाक्षीतिमंत्रेणशिरवा
बंधापुनर्गायत्र्यास्त्रिपादेशचम्यदर्भधारणंकुर्यात् तद्यथा॥
दर्भद्वयेनबध्नीयाच्छिखांचैवोपवीतकं आसनेकुक्षिदेशेच
द्वौद्वौदर्भौप्रकीर्तितौ॥ १ ॥दक्षिणानामिकायांचचतुर्दर्भ
पवित्रकं वामेदर्भत्रयंधार्यंसंध्यायांद्विजसत्तमैः॥ २ ॥
इतिदर्भान्धारयित्वाप्राणायामान्कुर्यात् तदुक्तंब्रह्मसं १४
हितायां कोष्ठस्थमनिलंसर्वनिःशेषंद्विजसत्तम मूला

धारेमनःकृत्वादक्षनाड्याविरचयेत्॥ ३ ॥सयाच्छिरसमु
च्चार्यसावित्रींब्रह्मरूपिणीं वामनाड्यानिलंब्रह्मध्यानेनापू
रयेच्छनैः॥ ४ ॥कुंभकेपुनरुच्चार्यविष्णुध्यानंसमाचरेत् त
थैवदक्षनाड्याचरुद्रध्यानंसमाचरेत्॥ ५ ॥वायुंविरचये
त्प्राज्ञःसावित्र्यात्पूर्वरूपया इत्येकःप्राणरोधश्चद्वितीयःपू
र्ववज्जपेत्॥ ६ ॥येनैवसंत्यजेत्येनतथैवापूरयेत्सुधीः॥
धारयेद्रेचयेत्तद्वच्छनैरेवंपुनःपुनः॥ ७ ॥एवंत्रिरसुरोध

21/1971

श्वजपादौचजपंक्तिके वैस्किकर्मणिप्रोक्तः प्रायश्चित्तेयथेच्छ
या॥ ७ ॥भूरादिव्याहृतीःसप्तसताराद्विजसत्तमः गायत्री
मनुमुच्चार्यव्याहृत्याचसमस्तया॥ ८ ॥चूडामंत्रंतदंतेच
जपेत्प्रणवपूर्वकं॥एषासयच्छिराःप्रोक्तासावित्रीप्रापारोध
ने॥ १० ॥अथप्राणायामन्यासः॥ ॐ प्रणवस्यपरब्रह्मऋ
षिः परमात्मादेवता देवीगायत्रीछंदः ॐबीजं ऊंशक्तिः १५
मंकिलकं विद्युद्वर्णः उदात्तस्वरः तालव्यंगोत्रं प्रणवमात्रा

णांवसिष्ठविश्वामित्रभरद्वाजऋषयः ब्रह्मविष्णुमहेश्वरा
देवताः गायत्रीत्रिष्टुप्जगत्यश्छंदांसि भूरंतरिक्षंद्यौस्थाना
नि पीतविद्युच्छ्यामावर्णाः जाग्रत्स्वप्नसुषुप्तयोवस्थाः सप्तव्या
हृतीनांविश्वामित्रजमदग्निभरद्वाजगोतमात्रिवसिष्ठकश्य
पाऋषयः अग्निर्वायुसूर्यबृहस्पतिवरुणेंद्रविश्वेदेवादेवताः।
गायत्र्युष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुप्जगत्यश्छंदांसि श्वेतर
क्तपीतकृष्णनीलपाटलपिंगलवर्णाः षड्जऋषभगांधारमध्य

गायत्र्य १६ मपंचमधैवतनिषादाः स्वराः पृथिव्यग्नेजवाय्वाकाशाप्राणा
त्मनोबीजानि श्रीकीर्तिमायाधृतिर्मेधास्मृतिवाचः शक्तयः॥
भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनलोकतपोलोकसत्य
लोकाः कीलकानि आग्निवेश्यकाश्यपगौतमांगिरसभार्ग
वकौशिकवासिष्ठगोत्राणि शब्दस्पर्शरूपरसगंधमनोबुद्ध्य
त्मत्वानि वितताजलिशकटविस्तृतमपाशग्रथितव्यापकांज १७
लिकामुद्राः प्राणापानव्यानोदानसमानमनोबुद्धिजनितपा

पोपशमनार्थेजपेविनियोगः ॐगायत्र्याविश्वामित्रऋषिः
सवितादेवता गायत्रीछंदः शिरोमंत्रस्य ब्रह्माऋषिः परमात्मा
देवता आसुरीगायत्रीछंदः सर्वेषांप्राणायामेविनियोगः ॐ
अंनाभौ ॐऊंहृदये ॐमंमुखे ॐभूःपादयोः ॐभुवः जा
न्वोः ॐ स्वः गुह्ये ॐ महः नाभौ ॐ जनः हृदये ॐ तपः कंठेॐ
सत्यं मूर्ध्नि ॐ तत्सवितुर्ब्रह्मात्मनेहृदयायनमः ॐवरेण्यंवि
ष्ण्वात्मनेशिरसेस्वाहा ॐभर्गोदेवस्यरुद्रात्मनेशिखायैवषट्।

25
1971

ॐधीमहिसत्यात्मनेकवचायहुं ॐधियोयोनःज्ञानात्मनेने
त्रत्रयायवौषट् ॐप्रचोदयात्परब्रह्मात्मनेअस्त्रायफट् इत्यं
गमंत्रानंगुष्ठादिक्रमेणकरयोर्विन्यस्यत्हृदयादिषुन्यसेत् ध्या
नं त्हृदयकमलमध्येसूर्यबिंबासनस्थंनिखिलभुवनबीजं
सृष्टिसंहारहेतुं अनतिशयसुखाढ्यंज्योतिषंहंसरूपंसकल
निगमपूर्वंचिंतयेदोंस्वरूपं इतिध्यात्वामानसैरुपचारैःपूज १७
यित्वा प्राणायामत्रयंकुर्यात् ॐभूःॐभुवःॐस्वःॐमहः

ॐजनःॐतपःॐसत्यंॐभूर्भुवःस्वःॐतत्सवितुर्वरेण्यभ 27/1971
र्गोदेवस्यधीमहि॥धियोयोनःप्रचोदयात् ॐआपोज्योतीर
सोमृतंब्रह्मभुर्भुवःस्वरों इतिपूर्ववत् सयछिरोगायत्र्यर्थं
ध्यात्वा प्राणायामंकुर्यात् अर्थंविनाप्राणायामफलंनस्या
त् योर्थज्ञइत्सकलंभद्रमश्नुतइतिवचनात् तद्यथा अथस
र्वदेवतात्मनःसर्वशक्तेःसर्वावभासहेतोर्जोमयस्यपरमात्मनः
सर्वात्मकद्योतनार्थंसर्वात्मप्रतिपादकोयंगायत्रीमंत्रः गायंतं

गायत्र्य० १८ त्रायतेयस्माद्गायत्री प्राणाद्वूर्ध्वसुन्नामयतश्चतिप्रणवः॥ प्राणा
नांआयामोयत्रक्रियतेततःप्राणायामः तत्रगायत्री प्रणवादि
सप्तव्याहृत्युपेतांशिरःसमेतांसर्ववेदसारामित्यथर्वांगिर
सं एवंविशिष्टांगायत्रीप्राणायामैरुपास्यब्रह्मरूपोभवति॥
ॐतत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतः भूरितिसन्मात्र
मंत्रउच्यते भुवरितिसर्वंभावयतिप्रकाशयतीतित्यत्याचिद्रू १८
पमुच्यते सुवरितिसुष्ठुसर्वेषुप्रियमाणंसुखरूपंपरमानंदं

ब्रह्मपदंतैपश्यतिसर्वतेजोरूपंसत्यमितिसर्वबाधाविरहितमुच्य
तेसत्यंज्ञानमनंतंब्रह्मेतिभूर्भुवःस्वरोमितित्रैलोक्यंसमस्त
व्याहृत्यर्थः तदितिद्वितीयैकवचनं अनेनाखिलजगदुत्पत्ति
स्थितिलयकारणहेतुभूतंउपनिषदिकथ्यमानंनिरूपमंत
त्सद्ब्रह्मतेजोमयंतत्सूर्यमंडलाभिधेयंब्रह्मादिभिधीयते असा
वादित्योब्रह्मेतिवचनात् सवितुरितिषष्ठ्येकवचनष्टुञ्प्रा
णिप्रसवइत्येतस्यधातोरेतद्रूपंसर्वप्राणिमात्रस्यप्रसवितुरि

29
1971

त्यर्थः वरेण्यंप्रार्थनीयंनियमादिभिरपहतकल्मषैःसततंध्येयमि
त्यर्थः भर्गः भंजआमर्दनेभृजिसर्जनेइत्येतयोर्धातोरेतद्रूपंभज
तांपापभर्जनहेतुभूतमित्यर्थः भ्रातृदीप्तावित्येतस्यवाभर्गस्तेज
इत्यर्थः देवस्येतिषष्ठ्येकवचनंदिवुक्रीडाविजिगीषाव्यवहारद्यु
तिस्तुतिस्वप्नमदमोदकांतिगतिषुइत्येतस्यधातोरेतद्रूपंदिव्य
तेक्रीडनत्वात् विजिगीषुत्वात् व्यवहारत्वात् द्युतित्वात् स्तुतित्वा १९
त् स्वप्नत्वात् सुमदत्वात् मोदकत्वात् सुकांतित्वात् गतित्वा

ज्ञानत्वात् प्राप्यत्वाद्वा देवस्य धीमहि ध्येयं चिंतयामः योसावादित्यांहि 31/1971
रण्मयः पुरुषः सोसावहमिति चिंतयामः धियः द्वितीयाबहुव
चनंयश्छांदसत्वात् लिंगव्यत्ययः यस्तेजः सूर्यमंडलाभिधेयंवरे
ण्यंश्रेष्ठंभर्गः पापभंजनहेतुभूतंतन्नो अस्माकंधियः बुद्धीः प्रय
स्करेषुकर्मसुप्रचोदयात् चुदप्रेरणेधातुःप्रेरणादित्यर्थः इति
भारद्वाजीयधर्मशास्त्रेव्याख्यास्मर्तव्याहरहर्द्विजैरिति आपः उ
दकंब्रह्मेत्युच्येत आपोवाइतिश्रुतेर्ज्योतिरितिर्ज्योतिर्मयंरसइ

तिसारात्मकं अमृतकैवल्यंआत्मतत्वंतत् ब्रह्मैवानंदपदंतत्किं
भूर्भुवःस्वरोमित्येवाक्षररूपंपंचवर्णात्मकंअयमेवपंचाक्षरी
मंत्रःप्रणवादिःप्रणवांतोवाइत्यथर्वांगिरससूत्रं एवमर्थंस्मरन्
ब्रह्माहमस्मीतिभावयन् प्राणायामत्रयंकृत्वामेमापापंदुरितक्ष
यद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातःसंध्यामुपाशिष्ये इतिसंकल्प्य
मार्जनंकुर्यात् आपोहिष्ठाकुशोदपोदक्षिपेन्मूर्ध्निप्रतिप्रणवसं २०
युतं आत्मानंप्रणवेनैवपरिषिंच्यजलैःसह कुर्यात्सप्रणवैःपाद्

मार्जनंतुकुशोदकैः यस्यक्षयायेतिजलेसकुशंप्रक्षिपेदधः।स्पृ
ष्ट्वाहस्तेनवामेनतटंनद्यादिकेषुच पाणिनादक्षिणेनैवमार्जये
त्सकुशेनतु पाणिस्थितोदकेनैववामहस्तोदकेनवा गृहेतुमा
र्जनंकुर्यान्नान्यथात्यब्रवीन्मनुः आपोहिष्ठेतितृचस्यासिंधु
द्वीपआपोगायत्री मार्जनेविनियोगः ॐआपोहिष्ठा॰ आपोज
नयथाचनः सूर्यश्चेतिमंत्रस्ययाज्ञवल्क्योपनिषदृषिः सू
र्यमामन्युमन्युपतयोरात्रिश्चदेवता प्रकृतीछंदः ममाभ्यंतरशु

33
1971

गाय॰प॰ २१

ध्यर्थमंत्राचमनेविनियोगः ॐसूर्यश्च॰ दर्भान्विसृज्यकुशा
पाणिभ्यांमार्जयेत् प्रणवयुक्तसमस्तयाव्याहृत्यागायत्र्या
आपोहिष्ठेतिनवपादैःशंनोदेवीरितिसप्तभिर्मार्जयेत् नवपा
दमतिक्रम्यअर्द्धर्चावसुसंख्यया ऋतंचप्रपावेनेवमार्जनं
समुदाहृतं भुविमूर्ध्नितथाकाशेआकाशेभुविमस्तके मस्त
केभुविमूर्ध्निस्यान्मार्जनशेरुदाहृतं इतिमार्जनं ऋतंचेकां २१
दृचंवापिद्विपदांवाजपेदृचं दक्षिनासापुटेनैवपापात्मानपमो

ह्येत् तज्जलंनावलोक्याथवामभागेक्षितोक्षिपेत् आ
चम्यविसृजेद्दर्भान् पुनरन्यांश्चधारयेत् भद्रंनोअपिवात
यमनइतिजलंप्रदक्षिणीकृत्यअर्घ्यंदद्यात् पाणिभ्यांजल
मादायगायत्र्याचाभिमंत्रितं रवेरभिमुखस्तिष्ठन्त्रिरूर्ध्वं
संख्योःक्षिपेत् द्वौपादौतुसमौकृत्वापूरयेदुदकांजलिं॥
गोशृंगमात्रमुत्सृत्यजलमध्येजलंक्षिपेत् प्रादेशस्तु प्रदे
शिन्यांतालोमध्यमयाभवेत् गोश्चशृंगमनामिकयावि

35/1971

तस्मिन्स्फटिकनिष्ठया इतिगोशृंगलक्षणं जलेषर्घ्यप्रदातव्यं
जलाभावेशुचिस्थले प्रातर्मध्याह्नयोःकालेउत्थायार्घ्यजले
क्षिपेत् तथाचापस्तंबः ईषन्नम्रःप्रभातेषुमध्याह्नऋजुसं
स्थितः उपविश्यतुसायाह्नेजलेत्वर्घ्यंनिक्षिपेत् कालाति
क्रमेणेयस्फटिकसंध्यमपिसर्वदा चतुरर्घ्यप्रदातव्यंगायत्र्या
शिरसासह तर्जन्यंगुष्ठयोगेनराक्षसीमुद्रिकाभवेत् यादृश २२
नियथाचार्घ्यतन्नोयंरुधिरंभवेत् असावादित्यमंत्रेणसोदके

नैवपाणिना प्रदक्षिणमनुव्रज्यत्वाचमेत्संध्ययोर्द्वयोः मंद 37
हानांविनाशायनिक्षिपेत्तुजलांजलीन् प्रायश्चित्तार्थमाच 1971
म्यमुच्यतेदेत्यहत्यया अथार्घ्यदानं गायत्र्याश्चिरर्घ्यंवयेद्
द्यात् गायत्र्यागाथिनोविश्वामित्रऋषिः सवितोदेवतागाय
त्रीछंदः रेबीजं णिशक्तिः यामितिकीलकं अर्घ्यप्रदानेविनि
योगः ॐभूःतत्सवितुर्ब्रह्मात्मनेतृदयायनमः ॐभुवःवरेण्यं
विष्ण्वात्मनेशिरसेस्वाहा ॐस्वःभर्गोदेवस्यरुद्रात्मनेशिखायवा

येवषट् ॐभूः धीमहिसत्यात्मनेकवचायहुं ॐभुवः धियोयोनः
ज्ञानात्मनेनेत्रत्रयायवौषट् ॐस्वः प्रचोदयात् परब्रह्मात्मने
अस्त्रायफट् इत्यंगमंत्रानंगुष्ठादिक्रमेणकरयोर्विन्यस्यत्रा
दिषुन्यसेत् ॐभूर्भुवःस्वरोंपरोरजसेसावदोंइतिदिग्बंधः॥
आदित्याभिमुखोभूत्वावेदसारंपरंज्योतिमूलभूतंपरात्परं॥
त्रादिस्थितंसर्वगतंमंडलांतर्गतंशिवं चिंतयेत्परमात्मानमपऊ २३
र्धंविनिक्षिपेत् ॐघृणिःसूर्य आदित्यो अष्टाक्षरंसोरमंत्रंजप्त्वा

अस्त्रोपसंहरणंकुर्यात्॥ अस्यश्रीअस्त्रोपसंहरणमंत्रस्य ब्र
ह्माऋषिः देवीगायत्रीछंदः श्रीत्रिमूर्तिरूपीपरमात्मादेवता अं
बीजं ऊंशक्तिः मंकीलकं अस्त्रोपसंहरणार्थेजपेविनियोगः॥
ॐअघोरास्त्रायहृदयायनमः ॐशशाङ्कास्त्रायशिरसेस्वाहा॥
ॐब्रंब्रह्मास्त्रशिखायेवषट् ॐनांनारायणास्त्रायकवचाय
हुं ॐपापाशुपतास्त्रायनेत्रत्रयायवौषट् ॐसुंसुदर्शनास्त्रा
यअस्त्रायफट् इत्यंगमंत्रानंगुष्ठादिक्रमेणकरयोर्विन्यस्य

39
1971

तदादिषुन्यसेत् ॐ शंनोदेवीभिरभ्रस्त्रोयतिदिग्बंधः ॐ उन्निषेदविगं
तव्यंपुनरागमनायच प्रविष्टेदविजुष्टंत्वंप्रविश्यत्वद्यंमम ॐ
प्रातर्देवीमित्यृक्पठेत् ॐ हिरण्यगर्भः समवर्तताग्रे॰ सशंरवच
कं॰ सोहमर्कमहंज्योतिरर्कज्योतिरहंशिवः आत्मज्योतिर
हंशुक्रः सर्वज्योतिरसोस्म्यहं आयापव्ययावायव्या और्वाय
व्यां हरोसिपाप्मानंमेविद्धि ब्रह्मगायत्र्यामपपाप्मानमवधू २४
न्वतां ॐ ब्रह्मणेनमः एवंप्रत्यर्च्यजपेत् ॐपरोरजसेसा

वदों असावादित्योब्रह्म ततः आचम्यतर्पणंकुर्यात् गायत्र्याः
छंदऋष्यादिस्मृत्वागायत्रीतर्पणेविनियोगः ॐभूःपुरुषंतर्प
यामि ऋग्वेदंतर्पयामि मंडलंतर्पयामि हिरण्यगर्भं॰ आत्मा
नं॰ गायत्रीत॰ वेदमातरं॰ सांकृतिं॰ संध्यांत॰ कौमारीत॰ ब्रा
ह्मीत॰ उषसंत॰ निमृजंत॰ सर्वार्थसिद्धिकरीं॰ सर्वे मंत्राधिपतिं
त॰ भूर्भुवःस्वः पुरुषंत॰ १ द्विराचम्य यदत्रसंस्थितंभूतं
स्थानमाश्रित्यसर्वदा स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छ

41
197

तु ॐमित्येकाक्षरंब्रह्मेतियाजुषंतजप्त्वाआसनपूजादिभूतशु
द्धिप्राणप्रतिष्ठामातृकान्यासपूर्वकंगायत्रीजपंकुर्यात् तद्यथा
कौशेलंवाथचैलंवाचार्मतोलमथापिवा वेत्रजंतालपत्रंवाकं
बलदर्भमासनं॥ १ ॥वंशाश्मदारुधरणीतृणपल्लवनिर्मि
तं वर्जयेदासनंमंत्रीदारिद्र्याधिदुःखदं॥ २ ॥गोशकृन्म
यंभिन्नंतथापालाशपिप्पलं प्रौढपादोनकुवृत्तस्वाध्यायंचै २५
वतर्पणं॥ ४ ॥आसनारूढपादस्फिजानुनोर्वाथजंघयोः॥

कृतावसस्थिकोयस्फप्रौढपादःसउच्यते॥ ५ ॥पृथिव्या
मेरुपृष्ठऋषिः कूर्मोदेवता सुतलंछंदः आसनेविनियोगः
चतुरस्रांधेनुरूपांपीतांकूर्मोपरिस्थितां शातकोटियोजनां
गांपृथ्वींध्यायेत्समासने॥ ६ ॥पृथ्वीत्वयाधृतालोकादे
वित्वंविष्णुनाधृता त्वंचधारयमांनित्यंपवित्रंकुरुचासनं॥
इत्यासनंस्थापयित्वा ॐभूर्भुवःस्वःकूर्मासनायनमः अ
नंतासनायनमः पद्मासनायनमः विमलासनायनमः स

43
1971

गा॰ प॰ २५ वैशाक्तिकमलायनायनमः आधारशक्तयेनमः दुष्टद्रावणा
यनमः श्रीलक्ष्मीनृसिंहायनमः इत्यासनंसंपूज्य तत्रपद्मा
सनेनस्वस्तिकासनेनउपविश्य अपसर्पंतुतेभूतायेभूताभू
मिसंस्थिताः येभूताविघ्नकर्तारस्तेगच्छंतुशिवाज्ञया अनेन
वामपादघातत्रयेणभौमान्फट्मंत्रेणादिव्यान्तिग्मदृष्टांत
रिक्षगान्विघ्नान्छोटिकाकारान्स्फालनेनोत्सार्यअग्निमु २५
द्रयाग्निप्राकारंविधायोर्ध्वकेशीतिशिखांबध्वामूलेनप्रणवेण

वाप्राणानायम्यब्रह्माद्यशेषपारंपर्यक्रमेणस्वगुरुपादांबु
जंतावात्मनोमीतिशिरस्यंजलिंकृत्वोच्चार्यगुंगुरुभ्योनमः
इतिवामस्कंधे गंगणपतयेनमइतिदक्षस्कंधे संसरस्व
त्यैनमः नाभौ दुंदुर्गायैनमः वामकुक्षौ० क्षांक्षेत्रपाला
यनमः दक्षिणकुक्षौ० आराध्यदेवतायै० गायत्र्यैनमोऽद्
द्रि० नमोमहद्भ्यइत्यृचंपठित्वा आचम्यप्राणानायम्यदे
शकालौस्मृत्वाममचतुर्विधपुरुषार्थसिद्धिद्वाराश्रीपरमे

45
1971

श्वरप्रीत्यर्थंगायत्रीमंत्रजपाधिकारसिध्यर्थंभूतशुद्धि
प्राणप्रतिष्ठामातृकान्यासादियोगपीठगायत्रीन्यासा
नूकरिष्ये इतिसंकल्प्य मूलाधारादुत्थितांविद्युत्सहस्र
प्रभाभासुरांबिसतंतुरूपांसुषुम्नामार्गेणहृदयकमल
मांगतांकुंडलिनींविभाव्यहृदयकमलाज्जीवंदीपकलि
काकारंगृहीत्वाद्वादशांतांबुजसहस्रदलगतांविभाव्यतत्र २७
जीवात्मानंॐहंसइतिमंत्रेणापरमात्मनियोजयेत् ततः

पादादिजानुपर्यंतंचतुरस्त्रंपीतंपृथ्वीमंडलंतत्रपादगमनक्रि
यागंतव्यगंधघ्राणपृथ्वीब्रह्मनिवृत्तिसमानवायून्संस्मृत्य
ॐह्रींब्रह्मणेपृथिव्याधिपतयेनिवृत्तिकलात्मनेकुंफट्स्वाहे
तिमंत्रमुच्चार्यतान्कुंडलिनीद्वाराअपानप्रविलापयामीत्यपां
स्थानेसंहरेत् जान्वादिनाभिपर्यंतंशुक्लमर्धचंद्राकारंज
लमंडलंतत्रहस्तादानदातव्यरससमनोजकविष्णुप्रतिष्ठादा
नान्स्मृत्वा ॐह्रींविष्णवेजलाधिपतयेप्रतिष्ठाकलात्मने

47
1971

ठुंफट्स्वाहेतिमंत्रमुच्चार्यतान्सर्वान्कुंडलिनीद्वाराअग्नौ
प्रविलापयामि इतिअग्निस्थानेसंहरेत् नाभ्यादिहृदयपर्यं
तंत्रिकोणवह्निमंडलंतत्रवायुविसर्गविसर्जनीयरूपचक्षु
स्तेजोरुद्रविद्याव्यानान्संस्मृत्य ॐ रुद्रायतेजोधिपतयेवि
द्याकलात्मनेठुंफट्स्वाहेतिमंत्रमुच्चार्यतान्सर्वान्कुंडलि
नीद्वारावायौप्रविलापयामीतिवायुस्थानसंहरेत् ततोहृदा २८
दिभ्रूपर्यंतंरुछंवर्तुलंषट्बिंदुलांछितंवायुमंडलंतत्रोपस्थानं

दतद्विषयस्पर्शस्पृष्टव्यवाग्वीर्यानशांत्यपानान्स्मृत्य ॐ ह्रैं
ईश्वरावाग्व्यधिपतयेशांतिकलात्मनेस्वाहा इतिमंत्रमुच्चार्यता
न्सर्वान्कुंडलिनीद्वाराआकाशेप्रविलापयामीत्याकाशेसंहरेत्
ततोभ्रूमध्यादिब्रह्मरंध्रपर्यंतंस्वछंवर्तुलंठुंफट्आकाशमंड
लंतत्रवाग्वदनवक्तव्यशब्दश्रोत्राकाशसदाशिवशांत्यतीता
प्राणान्संस्मृत्य ॐ ह्रौंसदाशिवायआकाशाधिपतयेशांत्य
तीताकालात्मनेठुंफट्स्वाहेतिमंत्रमुच्चार्यतान्सर्वानहंकारे

गा.प. २९ प्रविलापयामीत्यहंकारे प्रविलाप्यतमहंकारं महंमहत्त
त्वेमहत्तत्वंमातसंज्ञकशब्दब्रह्मस्वरूपायांतद्लूरवार्थभूता
यांप्रकृतौप्रविलापयामीतितांथातविधानित्यभुत्थबुद्धस्वभा
वस्वप्रकाशेसत्यज्ञानानंतानंदलक्षणेपरमकारणेआदित्य
वर्णस्वरूपेपरब्रह्मणिप्रविलापयेत् ततः शारीरस्यांतर्यामि
ऋषिः सत्योदेवताप्रकृतिपुरुषंछंदः शारीरस्यपापपुरुष २९
शोषणेविनियोगः इत्युक्त्वापुरुषनिःसृंपापमनादिसंप्त

वसंचितं ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुजद्वयं सुरापानं 51/1971
हृदायुक्तंगुरुतल्पकटिद्वयं तत्संसर्गपदद्वंद्वमंगप्रत्यंगपात
कं उपपातकरोमाणंरक्तश्मश्रुविलोचनं अविवेकंरवडूध
रंअहंताचर्मधारिणं असत्यश्ववहंक्लेंपैशून्येरसमाधरं
क्रोधदंष्ट्रासमायुक्तंकामवर्मिणमद्भुतं वामकुक्षिस्थितंमू
ढंक्रूररासभनिःस्वनं अंगुष्ठमात्रंव्याधिस्थंनिर्दहेत्तंयथावि
धि इतिपापपुरुषंविचिंत्य यमितिवायुबीजस्य किंकिंधक्र

गा॰प॰ ऋषिः वायुर्देवता जगतीछंदः शरीरेपापपुरुषशोषणेविनि
३० योगः इत्युक्त्वानाभिमूलेचषट्कोणंवह्निमंडलंयंबिचिंतयेत्
तद्बायुबीजधूम्रंचचंचलध्वजसंयुतं धूंधूंशब्दयुतंसर्व
शोषणंत्वीशदैवतं इतिध्यात्वापूरकयोगेणषोडशवारंवा
द्वात्रिंशद्वारंवावायुबीजमावर्त्यतद्बीजोच्छ्वासवायुनासशरीरंपा
पपुरुषंशोषितंविभावयेत् ततोरमित्यग्निबीजस्यकश्यप ३०
ऋषिः अग्निर्देवता त्रिष्टुप्छंदः शरीरपापपुरुषदाहनेवि

नियोगः इत्युक्त्वा चिंतयेद्धृदयेत्रिकोणंवह्निमंडलं विद्या
कलायुतंरुद्रदैवतंरंसमीरितं इतिध्यात्वाकुंभकप्रयोगेणच
तुःषष्टिवारंपंचाशद्वारंवाअग्निबीजमावर्त्यपापपुरुषभस्मं
रचयेत् ततोवमितिवरुणबीजस्य हिरण्यगर्भऋषिः वरु
णोदेवता त्रिष्टुप्छंदः प्लावनेविनियोगः वारुणमंडलंमू
र्ध्निशुभ्रचंद्रार्धसंनिभं सितपंकज॰ग्मांगंवस्याद्वरुणोदैवतं
इतिध्यात्वातद्बीजस्फुरतामृतेनतच्छरीरभस्मपिंडीभूतंविभा

53
197

वयेत् ततोलमितिपृथ्वीबीजस्यब्रह्माऋषिः ऐंद्रोदेवता गा
यत्रीछंदःकठिनीकरणेविनियोगः आधारमंडलेपृथ्वीमंडलं
वाज्वलांछितं चतुष्कोणंचकठिनंपीतवर्णंइंद्रदैवतं लंबी
जेनसमायुक्तध्यायेन्मनसिपूर्ववदितिध्यात्वातद्बीजोत्थ
कठिन्येतनुदृढांभावयेत् ततोहमित्याकाशबीजस्यब्रह्मा
ऋषिः आकाशोदेवता पंक्तीछंदः व्यूहनेविनियोगः इ
त्युक्त्वाआकाशमंडलंदृत्तंह्वादशांतेहमुज्वलं शांत्यतीता २१

कलायुक्तंचिंत्यमाकाशदैवतं इतिध्यात्वातदुत्थेनाकेशेनाव
काशंभावयेत् एवंस्वशरीरंविचिंत्यपरमात्मनःसकाशात्स
ष्टिक्रमेणतत्वादिस्वस्वस्थानंप्रापयेत् ततःपरमात्मनःस
काशाज्जीवं ॐसोहं इतिमंत्रेणात्हृदयकमलेभानयेत् ततः
स्वशरीरंपापरहितंनवंनिर्मलंसावित्रीदेवतायोग्यंविभाव
येदितिसंक्षेपतोभूतशुद्धिः॥ ॥भूतशुद्धिविहीननजपपू
जादिकंविने सर्वंनिरर्थकंविद्धिविपरीतफलार्थदं इतिवसि

55
1917

षसंहितावचनादावश्यकीभूतभुद्धिः अथस्वदेहेप्राणप्र
तिष्ठा तद्यथा तद्दिहस्तंनिधायायप्राणस्थापनमाचरेत्
ततोजन्मादिकद्यष्टक्रियासंस्कारसिध्यय षोडशप्रणवा
दृन्निःकृत्वाशक्तिंपरांस्मरेत् बालार्कमंडलाभासांचतुर्बा
हुंत्रिलोचनां पाशांकुशधरांश्चापंसाविंत्रींदधतींभजे ॐ
अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुरुद्राऋषयः।ऋग्य ३२
जुःसामानिछंदांसि चिद्रूपिणीप्राणशक्तिर्देवता आंबीजं।

ह्रींशक्तिः क्रोंकीलकं प्राणप्रतिष्ठायांविनियोगः इतिश्रि
रोमुखवद्दृदयगुह्यपादसर्वांगेषुक्रमेणविन्यस्यकरषडंगंन्या
संकुर्यात् तद्यथा ॐ आंह्रींक्रोंअंकंखंगंघंङं आंपृथिव्य
ष्तेजोवाय्वाकाशात्मनेहृदयायनमः ॐइंचंछंजंझंञं ई
शब्दस्पर्शरूपरसगंधाकाशात्मनेशिरसेस्वाहा ॐउंटंठं
डंढंणंऊंश्रोत्रत्वक्चक्षुरसनाघ्राणात्मनेशिखायैवषट्
ॐएंतंथंदंधंनंऐंवाक्पाणिपादपायूपस्थात्मनेकवचाय

52
1971

हुं ॐ पं फं बं भं मं औं वचनादानविसर्गानंदात्मनेनेत्रत्रयाय
वौषट् ॐ अं यं रं लं वं शं षं सं हं क्षं अः मनोबुद्धिरहंकारचि
त्तप्राणात्मनेअस्त्रायफट् इत्यंगमंत्रानंगुष्ठादिकमेणाकर
योर्विन्यस्यत्हृदादिषुन्यसेत् ॐ आं नमः नासेश्चरणपर्यंतं
ॐ ह्रीं नमः हृदादिनाभिपर्यंतं ॐ क्रों नमः मूर्धादिहृदयप
र्यंतं ॐ यं त्वगात्मनेनमः रं असृगात्मनेनमः लं मांसात्मने ३२
नमः वं मेदात्मनेनमः शं अस्थात्मनेनमः षं मज्जात्मनेनमः

सं शुक्रात्मनेनमः हं जीवात्मनेनमः लं अस्थात्मनेनमः
क्षं क्रोधात्मनेनमः इतिहृदयेन्यसेत् ततोहृदिहस्तंदत्वा
जपेत् ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं कं क्षं हंसः सोहं स्वा
हा मम प्राणइहप्राणाः ॐ आं० इत्यादिममजीवइहस्थि
तः आं० ममसर्वेंद्रियाणि ॐ आं० ममवाङ्मनश्चक्षुश्रो
त्रघ्राणजिह्वाप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहा हृदि
हस्तंदत्वाजन्मादिषोडशसंस्कारसिद्ध्येषोडशवारंप्रण

गा.प. वजपंकृत्वाध्यायेत् रक्तांबोधिस्थपोतोल्लसदरुणसरोजा
१४ धिरूढाकराब्जैः पाशंकोदंडमिक्षूद्भवगुणमथमप्यंकुशंपं
चबाणान् बिभ्राणासृक्कपालंत्रिनयनलसितापीनवक्षो
रुहाढ्यादेवीबालार्ककोटिद्युतिभवतुसुखकरीप्राणशक्तिःपरा
नः इतिध्यात्वामानसोपचारैः पूजयित्वातत्स्वरूपोभूत्वामा
तृकान्यासंकुर्यात् तदंगप्राणायामः इडयापूरयेद्वायुंस्वरैः २४
स्पर्शैश्चकुंभयेत् रेचयेद्यादिभिर्वर्णैः प्राणायामःसमाप्त

कः अस्यश्रीअंतर्मातृकाबहिर्मातृकामंत्रस्य ब्रजापति
ऋषिः गायत्रीछंदः मातृकासरस्वतीदेवता हलोबीजा
निस्वराः शक्तयः बिंदवःकीलकं श्रीगायत्रीजपांगत्वे
नन्यासेविनियोगः इतिऋष्यादिकंविन्यस्यकरषडंग
न्यासंकुर्यात् ॐ अंकं५ आंतर्दयायनमः ॐ इंचं५
ईंशिरसेस्वाहा ॐ उंटं५ ऊंशिखायैवषट् ॐ एंतं५ ऐं
कवचायहुं ॐ ओंपं५ औंनेत्रत्रयायवौषट् ॐ अंयं१०

61
1971

अः अस्त्रायफट् आदौकरंन्यासंविधायएवंहृदयादि
न्यासंकृत्वाअंतर्मातृकान्यासंकुर्यात् ततः अकारादिषो
डशबीजानिकंठस्थानेषोडशदले विशुद्धचक्रेग्रादक्षि
णेनन्यसेत् ॐ अंनमः ॐ आंनम इत्यादि० ककारा
दिद्वादशबीजानि हृदयस्थानेअनाहतचक्रेद्वादशदले
डकारादीनिदशबीजानिनाभिस्थानेमणिपूरकेदशदले। २५
वकारादीनिषड्बीजानिलिंगस्थानेषट्दले।वकारादी

निचत्वारिबीजानिगुह्यस्थानेआधारेचतुर्दले। हंक्षंम्बूम
ध्येआज्ञाचक्रेद्विदले इतिविन्यस्यध्यायेत् आधारलिंग
नाभौहृदयसरसिनेतालुमूलेललाटेद्विपत्रेषोडशारेद्वि
द्वादशदले द्वादशार्धेचतुष्के॥ वासांतेबालमध्येऽफकठस
हितेआदियुक्तस्वराणांहंक्षंतत्वार्थयुक्तंसकलंतनुगतंवर्ण
रूपंनमामि ततोबहिर्मातृकान्यासः प्राग्वत् ॐनमःशि
रसि आंनमोमुखेवृत्ते ईंनमोदक्षनेत्रे ऊंनमोवामनेत्रे॥

63
1971

ऊंनमः दक्षकर्णे. ऊंवामकर्णे. ऋंदक्षनासापुटे. ॠंवाम
नासापुटे. ऌंदक्षकपोले. ॡंवामकपोले. एंऊर्ध्वोष्ठे. ऐंअ
धरोष्ठे. ओंऊर्ध्वदंतपंक्तिषु. औंअधोदंतपंक्तिषु. अंशिर
सि. अः मुखांते. कंदक्षबाहुमूले. खंकूर्परे. गंमणिबंधे.
घंअंगुलिमूले. ङंअगुल्यग्रे. चंवामबाहुमूले. छंकूर्परे.
जंमणिबंधे. झंअंगुलीमूले. ञंअंगुल्यग्रे. टंदक्षपादमूले. ३६
ठंजानुनि. डंगुल्फे. ढंअंगुलीमूले. णंअंगुल्यग्रे. तंवामपा

दमूले. थंजानुनि. दंगुल्फे. धंअंगुलीमूले. नंअगुल्यग्रे. पंद
क्षपार्श्वे. फंवामपार्श्वे. बंपृष्ठे. भंनाभौ. मंउदरे. यंहृदि. रंदक्षां
से. लंककुदि. वंवामांसे. शंदक्षकक्षायां. षंवामकक्षायां. संह
दादिकरद्वये. हंहृदादिपदद्वये. क्षंहृदादिमुखे. क्षंसर्वांगे. इति
विन्यस्यमातृकासरस्वतीध्यायेत्. पंचाशद्वर्णभेदैर्विहितवद
नदोः पादहृत्कुक्षिवक्षोदेशांभास्वत्कपर्दीकलितशशिकला
मिंदुकुंदावदातां अक्षस्रक्कुंभचिंतालिखितवरकरांभ्य

65
1971

क्षणांपद्मसंस्थं अछाकल्पामतुछस्तनजघनभरांभारतीं
तांनमामि इतिध्यात्वामानसैरुपचारैःपूजयित्वा अकारादि
क्षकारांतांमातृकांअनुलोमविलोमतोजप्त्वापुनरनुलोम
तोजप्त्वाव्यापकत्वेनतत्तद्वर्णान्तत्तत्स्थानेषुध्यात्वागायत्रीमं
त्रन्यासंकुर्यात् ऋषिछंदोदेवतानिस्मृत्वान्यासान्समाचरे
त् इतिवसिष्ठसंहितावचनात् तद्यथा प्राणायामत्रयंकृत्वा ३७
ॐअस्यश्रीगायत्रीमंत्रस्यविश्वामित्रऋषिः गायत्रीछंदः श्री

सवितृरूपिणीसावित्रीदेवता ॐभूरेबीजं ॐभुवःशक्तिः
ॐस्वःयंकीलकं ममचतुर्विधपुरुषार्थसिध्यर्थंगायत्रीमंत्रज
पेविनियोगः ऋष्यादियथास्थानेविन्यस्य करसंपुटेनगाय
त्र्याकरयोर्व्यापकंकुर्यात् ॐतत्सवितुर्ब्रह्मात्मनेहृदयायनमः
गुरुयोन्यसामि ॐवरेण्यंविष्णवात्मनेशिरसेस्वाहा तर्जन्ययोः
ॐभर्गोदेवस्यरुद्रात्मनेशिखायैवषट् मध्यमयोःशिखायैवष
ट् मध्यमयोः ॐधीमहिसत्यात्मनेकवचायहुं अनामिकयोः

67
1971

ॐधियोयोनः ज्ञानात्मनेनेत्रत्रयायवौषट् कनिष्ठिकयोः ॐ
प्रचोदयात्परब्रह्मात्मनेअस्त्रायफट् करतलकरपृष्ठे
कयोर्विन्यसामि एवंहृदयादिशुन्यसामि भूर्भुवस्वरोमितिहि
न्बंधः अथव्यात्हतिन्यासः भूःपादयोर्विन्यसामि भुवःजान्वोः
स्वःकट्योः महःनाभौ जनःहृदये तपःकंठे सत्यंललाटे पर
ब्रह्मशिरसेस्वाहा अथपदन्यासः तत्सादयोः सवितुर्जंघयोः ३८
वरेण्यंकट्योः भर्गःनाभौ देवस्यहृदि धीमहि कंठे धियःमु

सुरवे॰ यः भ्रूमध्ये॰ नः ललाटे॰ प्रचोदयात् मूर्ध्नि॰ इतिपदन्या
सः ॐतत्सादयोः सगुल्फयोः विजंघयोः तुजान्वोः वैउर्वो:
रेगुह्ये॰ णिलिंगे॰ यंकट्योः भनाभौ गोउदरे॰ देस्तनयोः व
हृदि स्यकंठे॰ धीवक्त्रे॰ मतालौ॰ हिनासिकायां धिनेत्रयोः
योभ्रूमध्ये॰ योललाटे॰ नः पूर्वसुरवे॰ प्रदक्षिणसुरवे॰ चोप
श्चिमसुरवे॰ दउत्तरसुरवे॰ यात्ऊर्ध्वसुरवे॰ गायत्र्याश्चतुर्वि
शतित्यक्षरेषु दधिव्यादितत्वदृष्टिः तत्वप्रथमपादेलोकत्र

यदृष्टिः द्वितीयपादलोकालोकदृष्टिः तृतीयपादेघ्राणादि
दृष्टिः चतुर्थपादब्रह्मदृष्टिः प्रणवादिप्रणवांतांगायत्रीमंत्रं
चतुर्थचरणसंहितंत्रिवारंव्यापकत्वेनन्यसेत् तद्यथा ॐ
भूर्भुवःस्वः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि।।धियो
योनःप्रचोदयात् परोरजसेसावदों इतिकेशादिपादपर्यं
तंपादादिमस्तकपर्यंतंत्रिवारंन्यसेत् अथस्वदेहेयागपीठ ३९
न्यासः अंसयोरुद्वयोपकल्पितपादचतुष्टयंमुखनाभिपा

श्वेद्वयमध्योपकल्पितगात्रकंपीठरूपंनिजदेहंध्यात्वात
त्रन्यसेत् ॐ मूलाधोरमहाकालायरक्तवर्णायमंडूकाधा
रायनमः तदुपरिस्वाधिष्ठानपर्यंतंपंचवक्त्रायदशभुजायर
क्तवर्णवामदक्षिणपार्श्वायकालाग्निरुद्राय तदुपरिनाभि
पर्यंतंबंधूकरुचिरायेमूलप्रकृत्यै तदुपरिहृदयपर्यंतंशर
च्चंद्रप्रभायै पंकजद्वयधारिण्यै आधारशक्त्यै तदुपरिहृदय
पर्यंतंकूर्मायअनंतायवराहायपृथिव्यैअमृतार्णवाय

21
1971

गा०प० ४० रत्नद्वीपाय॰ स्वर्णपर्वताय॰ कल्पकोद्यानाय॰ मणिमयम॰
हाभूमिकायै॰ मणिमंडपाय॰ कल्पवृक्षाय॰ रत्नवेदिकायै॰
रत्नसिंहासनाय॰ ततःसिंहासनस्यपादगात्ररूपत्वेनदक्षां
सेरक्तवर्णायवृषभरूपायधर्माय॰ वामांसेश्यामवर्णायसिं
हरूपायज्ञानाय॰ वामोरौहरिद्वर्णायभूतरूपायवैराग्याय॰
दक्षिणोरौइंद्रनीलवर्णायगजरूपायऐश्वर्याय॰ एतत्पादरू ४०
पिणः ततोमध्येगात्रत्वेनत्रिदियोगपीठस्यमुरवेभ्यूरूपाय॰

कृष्णवर्णायखड्गचर्मधरायअधर्माय॰ वामपार्श्वेश्वररूपाय
अंधकारवर्णायअज्ञानाय॰ नाभौ॰ उन्मत्तपिशाचरूपायअ
वैराग्याय॰ दक्षिणपार्श्वेस्त्रीभूरूपायमुक्तकेशायनग्नाय
अनैश्वर्याय॰ ततोमध्येत्कमलेशोषाय॰ पद्माय॰ तत्रआनंद
कंदाय॰ संविन्नालाय॰ सर्वतत्वात्मकपद्माय॰ प्रकृतिमयपत्रे
भ्यो॰ विकारमयकेसरेभ्यो॰ पंचाशद्वर्णबीजाढ्यकर्णिकायै॰
तस्यांअंअर्कमंडलाय॰ ऊंसोममंडलाय॰ मंवह्निमंडलाय॰संस

73
1971

त्वाय॰रंरजसे॰तंतमसे॰ओंआत्मने॰अंअंतरात्मने॰पंपरमा
त्मने॰ह्रींज्ञानात्मने॰इतिविन्यस्य॰हृदयदेशेगायत्रीयंत्रंविभा
वयेत् तद्यथा रात्रेर्बाह्यकृशानुकोणाविलसद्भूरादिसत्क
र्णिकंवस्वस्त्रंस्वरयुग्मकेसरदलंवर्णैस्त्रिवर्णमनोः चूडामं
त्रतुरीयवेष्टितमिदंक्ष्माकोणतारांकितंगायत्र्याः कथितंमहः
प्रभृतिभिर्यंत्रंतुदीक्षांकितंगायत्र्याःकथितंमहः प्रभृतिभि ४१
र्यंत्रंतुदीक्षांकितं अस्यार्थः रात्रेःत्रिकोणाद्बहिःकृशानुको

णेषुविलसंतोभूरादयः भूः भुवः स्वः व्याहृतीबीजत्रयंभाव
यंतइत्यर्थः वस्वस्त्रेषुअष्टकोणेषुप्रतिदलेस्वरयुग्मसंपुटि
तंमनोर्गायत्रीमंत्रस्यत्रिवर्णंतदादिकलिखितंदीप्तमंत्रंभाव
यित्वाचूडामंत्रः आपोज्योतिरसोमृतंइत्यादिशिरोमंत्रःतेन
तुरीयंचतुर्थःपादःपरोरजसइतिअनेनचवेष्टितंक्ष्माकोणंभू
पुरेषुचतुष्कोणेषुतारादिमहत्प्रभृतिभिः अंकितंककारादिव
र्णैःक्षांतैर्बाह्यवेष्टितंभावयित्वामध्यत्रिकोणस्यसूर्यमंडलाका

रंतेजोरूपंवर्तुलंकोटिमार्तंडतेजोमयंचिंतायित्वातत्रवक्ष्यमाण
ध्यानरूपंश्रीसावित्रीध्यायेत् तद्यथा मुक्ताविद्रुमहेमनीलध
वछायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटांतत्वार्थवर्णा
त्मिकां गायत्रींवरदाभयांकुशकशांशुभ्रंकपालंगुणंशंखंच
चक्रमथारविंदयुगुलंहस्तैर्वहंतींभजे॥ १ ॥अथमालाध्यानं
हृदयकमलेयोगपीठेसुधासागरांतरालेमणिमयद्वीपेस्वर्ण ४२
मयपर्वतेस्वर्णप्राकारवेष्टितेनंदनोद्यानेचिंतामणिमंडपेरत्न

सिंहासनेचक्रराजायबिंबेकोटिसूर्यतेजोमयबालार्कायुत
प्रभांत्रिनेत्रांपंचवक्त्रांदशभुजांवरदाभयांकुशाम्रतोदपानपा
त्रजपमालाशंखचक्रांबुजयुग्मधरांदिव्यगंधानुलेपनींदिव्या
लंकारभूषितांकोटिकंदर्पलावण्यविलासवंतींप्रहसितमुखा
रविंदांसर्वावरणदेवताऋषिपितृगणपरिवृतांद्विजवत्सलां
सर्वाभीष्टदांसर्वपापहंत्रींश्रीसावित्रीचिंतयामिचिंतयेनवमा
त्मानंजपंकुर्यात्समाहितः मानसंपूजयित्वांवांविभुद्रुः साधको

77
1971

नमः एवंस्वकेनध्यात्वामानसोपचारैर्यथोक्तप्रेरणगुरूप
दिष्टेनपूजयित्वाप्रसन्नांत्हृदिध्यायन्नयायाशक्तिमूलविद्यां
सावित्रींमनसाजपित्वातज्जपंदेव्याहस्तेनिवेद्यआत्मपूजापुरः
सरंमानसयागंकुर्यात् उक्तंविश्वामित्रसंहितायां प्राणायाम
त्रयंकृत्वाप्रविश्यहृदयांबुजं देवतांतत्रसंचिंत्यमनसाराधयेन्न
मः येनक्रमेणयेमंत्रैर्यैर्द्रव्यैर्नानाविधैःशुभैः तेनक्रमेणतैरेव ४३
मानसोयागईरितः नवायोच्चारयन्मंत्रंमनसैवमनुंस्मरेत् मु

द्रांनदर्शयेन्नत्रहस्ताभ्यांभावयेन्नतः अत्रचावाहनंनोक्तं हृद 79
येमानसार्चने आराध्यमनसाभक्त्यागायत्रीजपमाचरेत् 1971
हृदयांबुजंसंबंधेतिसंबंधः हृदयांबुजमित्यत्रावाह्यवत्सा
सनेस्वयंउपविश्यतत्रैवदेवतासनेयोगपीठत्वेनमनसैव
पूजयित्वातेनार्घ्यस्थापनादिकर्मकालायनुमानसमेव
हृदयस्थेनकार्यमित्यर्थः तथावसिष्ठसंहितायां ध्यात्वा
त्रांतर्यजेत्पीठन्यासमार्गेणमंत्रवित् तस्मिन्पीठस्थितां

देवीगायत्रीमुक्तविग्रहां ध्यात्वायजेच्चंदनाद्यैमानसैर्भोज
नांतिकैः भोजनावसरेमैत्रीवैश्वदेवंसमाचरेत् मूलाधा
रगतेकुंडेदेवताग्निसमुज्वले धर्माधर्माधिनेत्र्यस्त्रमूल
मंत्रपुरःसरं असुंजुहोमिस्वाहेतिप्रत्येकंजुहुयात्सुधीः
हिंसानास्तिक्ययज्ञानमेद्यादंभकेतवे व्रात्यत्वमनृजु
त्वंचदारिद्र्यंशोकमत्सरौ अहंतासत्यपैशून्यंकामंक्रोधंम ४४
दंसूजं अक्षमांचामितांहारंभयंनिद्रांसुरेवतरं अधैर्यंदुष्टसं

तापंनीचसंगंत्वविद्यतां आसुरंभावमित्यष्टाविंशत्याहुतिभि
र्हुनेत् मनएवस्रवःप्रोक्तः सुषुम्नास्कगुदीरिता अंतर्निरंतर
निरिंधनमेधमामोहांधकारपरिपंथिनिसंविदग्नौ कस्मिं
श्चिदद्भुतमरीचिविकाशमूमौविश्वंजुहोमिचसुधादिशिवाव
मानं इत्यनेनैकाहुतिंपूर्णांदद्यात् तंदेततन्मयोभूत्वाजेपदि
छानुरूपतः तज्जपंसर्वदुःखध्वंसाविंत्रीचसमर्पयेत् तत
स्तुदेवतारूपाभूत्वातिष्ठेत्क्रियक्षणं इत्येवमांतरंयागंयागं

81
1971

गा.प.
४५

कृत्वात्मपूजयेत् अथात्मपूजा तत्र सजलेन पवित्रेण गाय
त्रीमुच्चार्य मूलाधारे हृदये भ्रूमध्ये च संप्रोक्ष्य मूलादिब्रह्म
रंध्रांतं दशप्रणवसंयुक्तं चतुष्पदं गायत्रीमुच्चार्य रवंडदं
डायमानेतेजोरूपं विभाव्य तत्तेजोभिरेकीभूतमानंदघ
नं गुरुमंत्रदेवतानामभेदेन सावयवीकृतं स्वशरीरं निर्मलं
मलागंधपुष्पधूपदीपैरंभुबुद्धैर्वात्मानं पूजयित्वा लं ४५
कारैर्भूषयित्वा योगपीठं विचिंत्य तत्तन्मंत्रैस्तत्तत्स्थानेसं

83
1971

प्रोक्ष्य ऊर्ध्वमार्गात् हृदये मूलाधारपद्मे चेति पंचसुस्थानेषु पंचकृत्वः पुष्पांजलिं दत्वा सवित्ररूपमात्मानं ध्यात्वा वर्णाक्षमालयाष्टोत्तरशतमष्टविंशतिवारं जप्त्वा पुनः प्राणायामत्रयं पूर्वकं ऋष्यादिकरषडंगं कृत्वा ध्यात्वा देव्याह्नेजपेतेजोमयं निवेदयेत् ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मेदेवित्वत्प्रसादात्सुरस्थिता इत्येनन मंत्रेणजपं निवेद्य चतुर्विंशतिमुद्राः प्रदर्शयेत्॥

सुदंददातिदेवानांद्रावयत्यसुरांस्तथा मोदनाद्रावणाच्चैव
मुद्रेतिपरिकीर्तितेतिवचनान्मुद्राप्रदर्शनमावश्यकं अथा
तोदर्शनान्मुद्राः समुस्रवंसंपुटंतथा ततोविततंविस्तीर्णं
द्विमुस्रवत्रिमुस्रवेततः चतुर्मुस्रवंपंचमुस्रवंषण्मुस्रवाधोमुस्रव
ततः व्यापकांजलिकारव्यंचशाकटंतदनंतरं यमपाशं
तुग्रथितंततस्यात्सन्मुस्रवान्मुस्रवं विलंबोमुष्टिकोमीन ४६
स्ततःकूर्मवराहकौ सिंहक्रांतंमहाक्रांतंततोमुद्गरपल्ल

वे एतामुद्राश्चतुर्विंशक्रायज्यासुप्रतिष्ठिताः एतल्लक्षण 85/197
माह समुस्रवंसंहतौहस्तावुन्नतौकुंचितांगुली संपुटंपद्म
कोणाभोकरावन्योन्यसंहतो विततंसंहतौहस्तावुन्नाना
वायतांगुली विस्तीर्णंसंहतौपाणीमिथोमुक्तांगुलीद्वयाः
संमुस्रवासक्तयोःपाण्योःकनिष्ठाद्वययोगतः शेषांगुलीनां
वैकल्येद्विमुस्रवात्रिमुस्रवादयः हस्तोषण्मुस्रवइत्युक्तामुद्रा
मुक्ताविशारदैः तीर्यकसंयुज्यमानाग्रोयुक्तमग्रंपेयास्त

था आकुंचिताग्रौसंयुक्तौन्युब्जौहस्तावधोमुखौ उत्तानो
तादृशावेवव्यापकाकुंचिताकरौ अधोमुखौबद्धमुष्टीमुक्ता
यांगुष्ठकौकरौ शकटंनामकथितंयमपाशमतःपरं बद्धमु
ष्टिकयोःपाण्योरुत्तानावामतर्जनी कुंचितान्यान्यथायुक्ता
तर्जन्यामनुवल्कया उत्तानसंधिसंलीनबद्धांगुलिद्वयोक
रौ सन्मुखावघटितौदीर्घांगुष्ठौग्रथितमुच्येत ऊर्ध्वांगुलीर्वा ४७
महस्तौतादृशादक्षिणेनतु अधोमुखेनसंयुक्तःसंमुखान्मुख

मुच्येत उत्तानोत्तानकोटीचविलंबःकथितःकरौ मुष्टीचा
न्योन्यसंयुक्तावुत्तानोमुष्टिकोभवेत् मीनस्फ संमुखीभू
तौयुक्तानामकनिष्ठिके ऊर्ध्वसंयुक्तवक्रायाशेषांगुलि
दलौकरौ अधोमुखःकरोवामहस्तादृशादक्षिणेनतु ए
षदेशेसआक्रांतःकूर्मोनामाभिधीयेत ऊर्ध्वमध्येवाम
भुजकस्त्वभ्वामाश्रयेत्करौ वराहोनाममुद्रेयंकथितासु
निसत्तमैः वर्णाश्रितौकरेकर्णसंश्रितावायतांगुली सिंह

85
1971

क्रौंतंनाममुद्रामहाक्रौंतंचकथ्यते किंचिदाकुंचिताग्रौव
हस्तौकृत्वातथाभवेत् ऊर्ध्वंचिद्भतोपाणिमुद्भरानामतज्ज्ञै
नी ग्रस्तादक्षिणहस्तेनमुद्राग्रोक्तामनीषिभिः अधोमु
खःस्थितोमूर्ध्निपल्लवोदक्षिणः करः मुद्राणांलक्षणंग्रोक्तं
वसिष्ठाद्यैमुनीश्वरैः अत्रमहासंहितोक्तोविशेषः नजा
तुदर्शयेन्मुद्रामहाजनसमागमे क्षुभ्यंतिदेवतास्तस्य ४८
विफलीवभवेदिति एतामुद्रानजानातितस्येदंवीनसिध्य

ति शापंनिदेवताःसर्वागायत्र्याक्षरसंस्थिताः एवंदर्शयिला
विश्वामित्रसंहितोक्तं गायत्रीकवचंजपेत् अस्यश्रीगाय
त्रीकवचस्य ब्रह्माऋषिः गायत्रीछंदः गायत्रीदेवता
ॐभूः रेबीजं ॐभुवःणिशक्तिः ॐ स्वः यंकीलकं ममगा
यत्रीप्रसादसिध्यर्थेजपेविनियोगः ध्यानं पंचवक्त्रांद
शभुजांसूर्यकोटिसमप्रभां सावित्रीब्रह्मवरदांचंद्रकोटि
सुशीतलां॥ १ ॥त्रिनेत्रांसितवक्त्रांच मुक्ताहारविराजि

87
(197)

तां वराभयांकुशाकशापानपात्राक्षमालिकाः शंखंच
क्राजयुगलंकराभ्यांदधंतीपरां सितपंकजसंस्थांचहंसा
रूढांसुरवस्मितां ध्यात्वैवंमनसांभोजेगायत्रीकवचंजपे
त् ॐ ब्रह्मोवाच विश्वामित्रमहाप्राज्ञगायत्रीकवचंशृणु।
यस्यविज्ञानमात्रेणत्रैलोक्यंवशयेत्क्षणात् १ सावित्री
मेशिरःपातुशिखायामृतेश्वरी ललाटंब्रह्मदैवत्याभ्रु ४९
वौमेपातुवैष्णवी २ कर्णौमेपातुरुद्राणीसूर्यासावित्रि

89
1971

कोबिके गायत्रीवदनंपातुशारदादेवतानछदे ३ द्विजा
न्यज्ञप्रियापातुरसनायोंसरस्वती सांख्यायनीनासिकां
मकपोलौचंद्रहासिनी ४ चुबुकंवेदगर्भाचकंठंपात्व
घनाशिनी स्तनौमेपातुरुद्राणीहृदयंब्रह्मवादिनी॥५
उदरंविश्वभोक्त्रीचनाभौपातुसुरप्रिया॥ ६॥जघनंनार
सिंहीचपृष्ठंब्रह्मांडधारिणी पार्श्वौमेपातुपद्माक्षीगुह्यं
गागोत्रिकावतु॥ ७ ॥ऊर्वारोंकाररूपाचजान्वोःसं

ध्यात्मिकावतु जंघयोः पातुअक्षोभ्यागुल्फयोर्ब्रह्मशी
र्षका ८ सूर्यापदद्वयंपातुचंद्रापादांगुलीषुच सर्वांगं
वेदजननीपातुमेसर्वदानघा ९ इत्येतत्कवचंब्रह्मन्
गायत्र्याःसर्वपावनं पुण्यंपवित्रंपापघ्नंसर्वरोगनिवा
रणं॥ १० ॥त्रिसंध्यंयःपेठद्विद्वान्सर्वान्कामानवाप्नु
यात् सर्वशास्त्रार्थतत्वज्ञःसभवेद्दविन्नमः॥ ११ ॥ ५०
सर्वयज्ञफलंप्राप्यब्रह्मांतेसमवाप्नुयात् प्राप्नोतिजप

71
1971

मात्रेणपुरुषार्थान्चतुर्विधान्॥ १२ ॥इतिश्रीविश्वा
मित्रसंहितायांब्रह्मकौशिकसंवादेगायत्रीकवचंस
पूर्णं॥ ॥एवंकवचंज्ञात्वागायत्रीचतुर्थपादमंत्रंज
पेत् ॐ अस्यश्रीचतुर्थपादस्य विमळऋषिः पर
ब्रह्मपरमात्मादेवता गायत्रीछंदः चतुर्थपादगाय
त्रीजपेविनियोगः ॐपरः तद्द्यायै० रजसशिरसि।
असावदोंशिरवायों परोरजसेकवचे असावदोंनेत्र

द्याः ॐपरोरजसेसावदोंअस्त्रे० ॥ इतिकरषडंगंन्यासंकृत्वा
ॐभूर्भुवःस्वरोंपरोरजसेसावदोंसर्वांगे ध्यानं दर्शाह
स्तांपंचवक्त्रांकोटिसूर्यसमप्रभां पद्महस्तांवेदगर्भां
ब्रह्मरूपांस्मरेत् इतिध्यात्वा मानसोपचारैः पूजयित्वा
अष्टवारंचतुर्थपादजपंकृत्वा गायत्रीतर्पणंकुर्यात् तत्रा
दौविसर्जनमुद्राः प्रदर्शयेत् सुरभिर्ज्ञानभूर्पंचयोनिःकू ५१
र्मोथपंकजं लिंगंनिर्याणमुद्राश्चजपांतेष्टावुदाहृताः॥

93
1971

इतिदर्शयित्वावसिष्ठशापविमोचनंकुर्यात् अस्यश्रीवसि
ष्ठशापविमोचनेकुर्यात्मंत्रस्य विश्वामित्रऋषिः सूर्योदेव
ता गायत्रीछंदः वसिष्ठशापविमोचनार्थेजपेविनियोगः
ॐ अहोदेविमहादेविसंध्येविद्येसरस्वती अजरेअमरे
चैवब्रह्मयेनेननमोस्तुते वसिष्ठशापान्मुक्ताभव ततःआ
चम्यगायत्रीतर्पणंकुर्यात् ॐभूर्भुवःस्वःपुरुषंऋग्यजुः
सामसंडलांतर्गतंसवितारंआवाहयामि इत्यावाह्यतर्पणंकु

143284

र्यात ॐ भूःपुरुषमृग्वेदंतर्पयामि ॐ भुवःपुरुषंयजुर्वेदंत० ॐ स
हःपुरुषंअथर्ववेदंत० ॐ जनपुरुषेतिहासपुराणंत० ॐ तपः
पुरुषंसर्वागमंत० सत्यंपुरुषंसर्वलोकंत० ॐ भूर्भुवस्वः
ऋग्यजुःसाममंडलोंतर्गतंत० ॐ भूःएकपादंगायत्रीत०
भुवःद्विपादंगायत्रीत० ॐ स्वःत्रिपादंगायत्रीत० भूर्भुवःस्वः
चतुष्पादगायत्रीत० उषसंत० गायत्रीत० सावित्रीत० सर ५२
स्वतीत० वेदमातरंत० पृथिवीत० जयांत० कौशिकीतर्प०

सांकृतीत० सर्वापराजितांत० सहस्रमूर्तित० अनंतमूर्ति 93A
त० २४ एभिर्मंत्रैश्चयोनित्यं चतुर्विंशतिभिर्द्विजः सुतर्प 1971
यतिगायत्रीत० मासंध्याफलमाप्नुयात् इतिगायत्रीतर्प
णं अथजपलक्षणं शौनकः गायत्रीसंस्मरेत्धीमान्
उदिवासूर्यमंडले कल्पोक्तलक्षणेनैवध्यात्वाभ्यर्चततो
जपेत् प्रातस्तिष्ठन्जपेद्देवीसायंचैवोपविश्यच उपविश्य
चमध्याह्नेजपकर्मसमारभेत् ऊर्ध्वजानुस्तुसायोह्नध्याना

लोकनतत्परः पूर्वसंध्याजपंस्तिष्ठन् सावित्रीकर्मदर्शनात् पश्चिमातुसमासीनः सम्यङ्नक्षत्रदर्शनात् अथांगुल्या दिजपलक्षणं अंगुल्यैवजपंकुर्यान्नतुकाम्यंकदाचन।। रुद्राक्षाद्यैः सर्वसिद्धिरतो मालांप्रकल्पये अथकरमालया क्षमालयावाजपंकुर्यात् तत्रगायत्र्युच्चारणधर्मः कथ्यते। प्रणवंपूर्वमुच्चार्यभूर्भुवः स्वस्ततः परं गायत्रीप्रणवंचोते जपएषउदाहृतः वाचिकाख्यउपांशुश्चमानसस्त्रिविधःस्मृ

तः त्रयाणांजपयज्ञानांश्रेष्ठस्याद्दुत्तरोत्तरः यदुच्चनीचस्व रितैः शब्दैस्पर्शीयदाक्षरैः मंत्रमुच्चारयेद्वाचाजपयज्ञःस वाचिकः शनैरुच्चारयेन्मंत्रंमंदमोष्ठौप्रचालयेत् अपरै रश्रुतः किंचित्सउपांशुजपस्मृतः विधायचाक्षरश्रेण्यांव र्णीवर्णपरात्परं शब्दार्थचिंतनंभूयः कथ्यतेमानसोजपः। वाचिकस्त्वेषएवस्याद्उपांशुःशतमुच्यते सहस्रंमानसः प्रो क्तोमन्वत्रिभृगुनारदैः ब्रह्मचारीगृहस्थश्चशतमेष्टोत्तरं

गा.प. ५७ जपेत् अष्टोत्तरशतंनित्यंअष्टाविंशतिमेववा विधाना
दृशकंवापित्रिकालेसंजपेद्द्विजः श्राद्धेप्रदोषदर्शेचगाय
त्रीदशासंख्यया अष्टाविंशत्यनध्यायेसुदिनेजपेत् जपांते
ऋष्यादिन्यासंविधायगुह्यातिगुह्यमंत्रेणजपंनिवेदयेत्।
अथसंध्योपस्थोपस्थानं मित्रोजवधिष्टेनान्यतिनवऋचसू
क्तं द्यौदिवइत्येका गणानांत्वेत्येका जातवेदसे०त्र्यंबकं० ५८
ॐनमःप्राच्यैदिशेइंद्राय०इत्यादिशतियाजुषं संध्यायै०सा

९१
१९१।

वित्र्यै०गायत्र्यै०सरस्वत्यै०ब्रह्मणे०विष्णवे०शिवाय०
आत्मने०परमात्मने०अंतरात्मने०सर्वभूतात्मनेनमोन
मः स्योनापृथिवीत्येका मानस्तोकेत्येका समानीवःआ
कूतिः अनोदेवावर्गः भद्रंनोअपिवात०तच्छंयोः भूरादि
व्याहृतिपूर्वंशांतिंजप्त्वाप्रवराद्युच्चार्यअमुकशर्माहंभोअ
भिवादये ॐनमोमहद्भ्यः ॐगुरुभ्योनमः आत्मपादौ
भूमिस्पृष्ट्वा०सावित्रीचतथासूर्यंद्विजानथभिवादयेत्

ज्येष्ठंवाथकनिष्ठंवासंध्यांतेचाभिवादयेत् वर्जयेत्सुसुतं
शिष्यंदौहित्रंदुहितुःपतिं नित्यंवेदमधीतारंतथाध्याप
कंद्विजं अनधीतानमस्कुर्याज्ज्येष्ठोवापिकनीयसं इति
प्रातःसंध्याविधिः अथमध्याह्नसंध्याविधिः कुर्यान्म
ध्याह्निकींसंध्यांब्रह्मयज्ञादनंतरं संगवाद्ऊर्ध्वमेवाकुर्नचे
दवीगमथापिवा आदौद्विराचम्य प्राणानायम्यपूर्ववत्
ममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंमध्याह्नसं ५५

ध्यामुपाशिष्ये आपोहिष्ठेतिमार्जनंकृत्वा आपःपुनंत्वि
तिमंत्राचमनंविधायसकृदाचम्य आपोहिष्ठेतित्यादिन
वर्चंमार्जनं ऋतंचेतितृचेनाघमर्षणं सकृदर्घ्यंतुमध्या
ह्नेप्रक्षिपेद्रुंसइत्यृचा त्रिर्वाकृष्णेनमंत्रेणगायत्र्याचेति
केचन उतायातंऋक्॰ शेषंपूर्ववत् संध्यातर्पणं भुवः
पुरुषंतर्पयामि यजुर्वेदंत॰ मंडलं॰ रुद्ररूपं॰ अंतरात्मा
नं॰ सांकृतिं॰ संध्यां॰ युवतिं॰ रौद्रीं॰ उषसं॰ निम्रुचं॰

सर्वार्थसिद्ध्यिदं० सर्वेसत्राधिपतिं० ॐ भूर्भुवःस्वः गाय त्रीतर्पणोविशेषोनास्ति द्विराचम्य उदुत्यमितित्रयोदश र्चंसूक्तं चित्रंदेवानामितिषळृचंसूक्तं हंसःशुचिषदिति शेषंपूर्ववत् इतिमध्याह्नसंध्याविधिः अथसायंसंध्या आचम्यप्राणानायम्यमार्जयित्वा अग्निश्चेतिमंत्रोदकंप्रा श्यपूर्ववन्मार्जनंकृत्वाघमर्षणंविधायअर्घ्यदानंरात्रौचे दृरुणायसरस्वतीतर्पणंकुर्यात् ॐ स्वःपुरुषंसामवेदमं

डलंविष्णुरूपिणीं० परमात्मानं० सरस्वतीं० वेदमातरं० सा कृतिं० संध्यां० स्रविरां० वेष्णवीं० उषसं० निम्रुचं० सर्वार्थसि द्धिकरीं० सर्वमंत्राधिपतिं० ॐ भूर्भुवः स्व० तर्पयामि० गायत्री तर्पणंचेतिशेषंपूर्ववत् उपस्थानं यच्चिद्धितेदशर्चंसूक्तं इमंमेवरुण० तत्त्वायामि० वयमद्येंद्र० शेषंपूर्ववत् इतिसायं संध्याविधिः इत्येवंसंध्यात्रयकालेसंध्यादिकंकृत्वादेवतात्मा सुखंविहरेत् इतिप्रसंगतः मध्याह्नसंध्यासायंसंध्याविधिः॥

गाथ· ५७ यथोचितकालेकर्तुमशक्तश्चेन्मनसासूर्यमंडलंध्यायन्मन
सैवतत्तत्कालेॐऐंह्रींश्रीपरमदुष्करकर्मछेदिनिअघोरव
रेदविद्येमायेत्रैलोक्यरूपसहस्रपरिवर्तिनिमातृगणेस्तू
श्रीह्रींऐंॐइतिजप्त्वासंध्याफलासिद्धिर्भवतीतिप्रत्यंगिरा
सूत्रवचनात् अथप्रातःसंध्यावंदनानंतरंपुरश्चरणकृत
नद्यादौस्थळे ततःपरमत्रैवनद्यादौसूर्यार्घ्यंनद्यादितिकस्य ५७
चिन्मत्तंपूजाप्रदेशंगत्वानद्यादाविति वसिष्ठसंहितायां॥

अग्रेवक्ष्यते ततोमूलेनाभिमंत्रितेजलेनाचम्यगुरुदिक्पति
ग्रहान्प्रणम्य इतिसंतर्पितस्वात्मदेवतंसुदृढव्रतः मौनीदेवी
हृदयकमलेध्यायन्मूलंवापिस्तवंजपन्बुधः स्वपदहृन्नेत्री
यायाद्यागस्यमंडपमिति· पूजाप्रदेशमागत्यदत्वाचार्घ्यंवि
वस्वेते गंधपुष्पादिभिः सम्यग्द्वारपूजासमाचरेत् तत्रगत्वा
प्रांगणैकदेशास्थित्वा मूलमंत्राभिमंत्रितेनजलेनप्राङ्मुखोवा
प्युदङ्मुखोमौनीआजानुपादौमणिबंधपर्यंतंकरौचप्रक्षाल्य

103
1971

गाय० ५८

द्विरात्रमेतत् प्रांगणएवगोमयप्रलिप्तभूमौसौधमध्यांवासूर्यो
र्घ्यंदद्यात् तद्यथा प्राङ्मुखःसुखासनमुपविष्टोगुर्वादिवंदन
पूर्वकंअष्टाक्षरसूर्यमंत्रेणप्राणायामत्रयंकृत्वा ॐघृणिःसू
र्यआदित्योंइत्यष्टाक्षरमंत्रः ॐअस्यश्रीसौराष्टाक्षरमंत्र
स्य ब्रह्माऋषिः आदित्योदेवता गायत्रीछंदः सूर्यार्घ्यप्र
दानेविनियोगः गायत्रीमंत्रस्यऋष्यादिकंस्मृत्वासूर्यात्म ५८
कमात्मानंध्यात्वात्रिकोणगर्भितषट्कोणंदृत्तात्मकंमंडलं

105
19.71

निर्मायतत्र ॐब्रह्मविष्णुशिवात्मक ... यायोगपीठायनम
इतिसंपूज्यगायत्र्यस्त्रमंत्रेणशुभोदकैःपूरयित्वासूर्यमं
त्रेणकुंकुमरोचनारक्तचंदनादि करवीरजपापुष्पदूर्वाक्षतां
निक्षिप्यभानुनैक्यंसकल्प्य सूर्यमंत्रं लिखित्वातदुपरिसूर्यं
ध्यात्वा आवाहनादिकंकृत्वा सूर्यमंत्रमुच्चार्य सौं गायत्रीसू
र्यायइतिसंपूज्य सोमाद्यष्टोग्रहांश्चपूर्वादिमंडलाकारेणसंपूज्य
कराभ्यांपात्रमाछाद्यसूर्यमंत्रमष्टोत्तरशतंद्वादशावारंजपित्वा

गाय० ५९ पुनः सूर्यं संपूज्य गंधादि निवेद्य सूर्यमंडलेदेवीध्यात्वा जानु
भ्यामवनीगत आमस्तकमर्घ्यपात्रमुन्नाल्य व्याम्निसावरैणे
रवौस्वेक्येनदृष्टिंनिपात्य ॐ ह्रांह्रींसः घृणिः सूर्यआदित्यो
ग्रहनक्षत्रपरिवृताय मार्तंडभैरवाय प्रकाशशक्ति सहिताय
द्वादशकलात्मनेगायत्रीरूपिणेसूर्यायएषोर्घ्यः स्वाहा इति
सावित्रीमंत्रपूर्वकंसावित्रीदेवताबुध्यापुरतोदद्यात् ततःपुष्पा ५९
जलिंकृत्वासूर्यमंत्रस्यजपंकृत्वासमर्प्यस्तुत्वानत्वाभानो

107
1971

क्षमस्वेतिसंहारमुद्रयाविसृजेदितिसूर्यार्घ्यविधिः अथ
सामान्यार्घ्यंकुर्यात् तद्यथा देहल्यग्रतः श्वतुरस्रवृत्तत्रिको
णमंडलंकृत्वाअस्त्रमंत्रेणताम्रादिपात्रंप्रक्षाल्यसाधारंस्था
पयित्वाहृदयमंत्रेणशुभोदकेनापूर्यगंगेचेत्यादितीर्थमंत्रे
णांकुशमुद्रयासूर्यमंडलात्तत्रतीर्थमावाह्यॐकारमुच्चर
न् गंधपुष्पेनिक्षिप्य प्रणवेनत्रिरभिमंत्र्यधेनुमुद्रांप्रदर्शयेदि
तिसामान्यार्घ्यविधिः सर्वत्रततस्तदर्घोदकैरस्त्रमंत्रेणद्वार

गाय० ६० मभ्युक्ष्यगंधपुष्याक्षतैरंबुपुष्पाभ्यां वाद्वारदेवताः पूजयेत्
द्वारस्योर्ध्वशारवायां ॐ विघ्नेशाय० महालक्ष्म्यै० सरस्वत्यै०
दक्षिणशारवायांगणेशाय० वामशारवायांक्षेत्रेशाय० द
क्षिणे गंगायै० वामेयमुनायै० दक्षिणे धात्रे० वामे विधा
त्रे० दक्षिणे शंखनिधये० वामे पद्मनिधये० अधोदेहल्यं अ
स्त्रदेवतायै० इत्येवंपूर्वद्वारमारभ्यउत्तरद्वारपर्यंतंपूजयित्वा ६०
तत्तद्वाराधिपान्मंत्रैर्यजेत् देहल्यग्रेतोदक्षिणवामक्रमेण पू

109
1971

र्वद्वारे ॐ ब्राह्म्यै० माहेश्वर्यै० दक्षिणद्वारे कौमार्यै० वैष्णव्यै
० पश्चिमद्वारे वाराह्यै० इंद्राण्यै० उत्तरद्वारे महालक्ष्म्यै० चा
मुंडायै० मंडपाभावे मंडपंकल्पयित्वा तत्रैवपूजयेदितिद्वार
पूजाविधिः ततोविघ्नोपसारणं कुर्यात् ततोमूलमंत्रमस्त्र
मंत्रेवामनासाजपन् दिव्यदृष्ट्यादिव्यानुऊर्ध्वोर्ध्वतालत्रये
णांतरिक्षान्वामपार्ष्णिघातैस्त्रिभिर्भौमांश्चविघ्नानुत्सार्यशा
नैरंगंसंकोचयन्स्वदक्षिणांसेनद्वारवामशारवांस्पृशन्नि

जवामपादपुरःसरंगृहांतःप्रविशेत् ततःकांस्यघंटास्वनं
कृत्वाद्वारमाछाद्यवाससा पंचगव्यार्घ्योयाभ्यांप्राक्षयेन्मे
ऽपांतरमिति ततोमंऽपांतःपूजावेद्याबहिरुपविश्यनैर्ऋत्यां
दिशि ॐब्रह्मणे० वास्तुपुरुषाय० इतिसंपूज्यकृतांजलिः
पठेत् ॐदविष्वंप्राकृतंचिन्मेपापाक्रांतमभून्मम तंनिःसा
रयचिन्नान्मेपापंकुंफट्नमोस्तुते सोमःसूर्योयमःकालो ६१
महाभूतानिपंचच एतेशुभाशुभस्येहकर्मणोनवसाक्षि

111
1971

णः॥ २ ॥इतिमंत्रद्वयंपठित्वाकुंफडित्यनेनक्रोधदृष्ट्या
पार्श्वद्वयमूर्ध्वमधश्चनिरीक्ष्यसुमनामनेवत् ततःसित्था
र्थाक्षतकुसुमंसप्तधाभिमंत्रितं अस्त्रमंत्रंपठन्गृहमध्ये
निक्षिपेत् ॐतीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम॥
भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि इत्यनेनभैरवा
ज्ञांगृहीत्वा अःफडितिमंत्रेणवेद्यांगत्वादेव्याःपूजनस्था
नंविशोधयेत् गायत्र्याभुवमभिमंत्र्यनिरीक्ष्यअस्त्रमं

गाय० ६२ त्रेणप्रोक्ष्यतेनैवदर्भैस्ताडयित्वाकवचमंत्रेणाप्युक्षये
दिति० चतुर्विधःसंक्षारोभुवः० ततश्चंदनागुरुगंधाद्यैर्धू
पयेन्मंडपांतरमिति० ततस्तस्यांवेदिकायांपुरतोदेव्यास
नस्थलमुत्सृज्यस्वासनभूमौगायत्रीप्रसवंवाविलिख्य
तत्रपुष्पंदत्वातदुपरिकुशाजिनांबरैराद्यमेहस्तंद्विहस्तंवा
चतुरंगुलमुच्छ्रितंकंबलाद्यन्यतमंमृदासनमास्तीर्यतस्यपू ६२
र्वभागे ॐभूःदक्षिणेभुवःपश्चिमेस्वःउत्तरेभूर्भुवःस्वःलि

113
1971

खित्वामूलेनप्रणवेनवाशुभैर्जलैःसंप्रोक्ष्यतत्रमातृकांभो
जंचिंतयित्वापूर्ववन्मूलाधारादिपृथिव्यंतंआसनंसंपूज्य
पृथित्वयेत्यादिअभ्युक्ष्यॐआधारशक्तिकमलासनाय
नमः इत्यनेनगंधपुष्पैःपूजयेदित्यासनपूजा ततस्तस्मि
न्नासनेप्राङ्मुखोवोदङ्मुखोमौनीस्वस्तिपद्मयोरन्यतम
क्रममास्थायऋजुकायोनिराकुलःसमुपविशेत् ततःस्वा
सनस्याग्नेयकोणेगंगणपतयेनमः नैर्ऋत्येसंसरस्वत्यै०

गाय० ६३ वायव्ये० दुंदुर्गायै० ईशान्ये क्षौंक्षेत्रपालाय० ततः शिव
स्यवाहरेर्वापिसूर्यस्याग्रेगुरोरथ॥ दीपस्यज्वलितस्यापि
संनिधानंप्रकल्पयेत् इत्येतेषांएकस्यसमस्तस्यवा सा
न्निध्यंपरिकल्यद्रव्याण्यासादयेत् स्थापयेद्दक्षिणेभागे
पूजाद्रव्याणिचात्मनः सुवासितांबुसंपूर्णेसव्येकुंभंस्फ
शोभनं प्रक्षालनायकरयोः पात्रंपृष्ठनिवेशयेत् घृतादि ६३
ज्वलितान्दीपास्थापयेत्परितःशुभान् दर्पणंचामरंछत्रं

115
1971

तालंवृन्तंचपादुके पूजासामग्रिकांविप्रपुरतःसाधनांत
रमितिविश्वामित्रसंहितायां अन्यानिहोमद्रव्याणियथा
स्थानंनिवेशयेत् इतिपूजाद्रव्यासादनं ततस्तानिनेत्रमंत्रे
णविलोक्यरंस्वाहेतिदीपत्रिरवांस्पृष्ट्वाक्ष्रौंस्वाहेतिमंत्रेण
अंगुल्यग्रेणजलंस्पृष्ट्वाओंस्वाहेतिमंत्रेणतत्पात्रंस्पृशे
दितिपूजाद्रव्यशुद्धिः ततःकृतांजलिपुटोभूत्वा० ॐवामे
ॐगुंगुरुभ्योनमः दक्षिणेगंगणपतयेनमः अग्रेश्रीमत्स

वित्तमंडलांतर्गतगायत्र्यैनमः इतिप्रणम्यकरशुध्यादिकं
कुर्यात् तद्यथा प्रणवमुच्चार्यगंधपुष्पाभ्यांकरौसंमार्ज्यवा
महस्तेननिर्मथ्याघ्रायतत्पुष्पमुत्तरस्यांदिशिक्षिपेत् ततो
गुलीषुअंगमंत्रान्न्यसेत् ॐतत्सवितुर्ब्रह्मात्मनेतर्जन्याय
नमइतिषडंगमंत्रानंगुष्ठादिक्रमेणकरयोर्विन्यसेत् तदुक्तं
वसिष्ठसंहितायां आसीनःप्रणवेनाथपराम्रृज्यकरांबुजे
अंगुलीषुचविन्यस्यअंगमंत्राननुक्रमात् अस्त्रमंत्रेणदि

117
1971

ग्बंधंकुर्यात्सर्वासुदिक्षुच अग्निप्राकारवत्कृत्वाततोमंत्रेण
सर्वतः प्राणायामत्रयंकुर्यान्मूलेनप्रणवेनवेति मंत्रोगाय
त्रीमंत्रः इतिकरशुद्धिः ततःपूर्वोक्तमार्गेणप्राणानायम्यदे
शकालौस्मृत्वाधिकफलार्थश्चेत् पुनःभूतशुद्धिप्राणप्रति
ष्ठामातृकान्यासान्स्वदेहेविधायआत्मपूजांपुरःसरंसंक्षेप
तोंतर्यागंकृत्वावाह्यपूजांसमारभेत् तद्यथा प्राणायाम
पूर्वकंगायत्रीध्यानोक्तंस्वैक्येनप्रथमंध्यात्वास्वशिरसिपु

ष्पंदत्वापुनरपिहृदयकमलेयोगपीठंचिंतयित्वातदुपरिदे
वींगायत्रींध्यात्वामानसोपचारैःयथोक्तप्रकारेणसम्यक्
पूजयित्वाप्रसन्नांतांहृदिध्यायन्दशाधागायत्रीजप्त्वायो
निमुद्रयाप्रणम्यबात्यपूजार्थंप्रथमंयंत्रोद्धारंकृत्वायजेत्
तदुक्तंविश्वामित्रसंहितायां बिंदुत्रिकोणंषट्कोणंततोवृत्त
त्रयंलिखेत् चतुरस्रद्वयंबात्येचतुर्द्वारोपशोभितं बंदवेपू ६५
ज्यगायत्रीत्रिसंध्याभ्यत्रिकोणके षडंगानिचषट्कोणपूज

119
1971.

येत्प्रयतःसुधीः अष्टारपूजयेदष्टौवसून्रुद्रांश्चबात्यतः॥
क्रमेणादित्यदेवांश्चपूर्वादिक्रमशोयजेत् ततोबात्यादिकप
तिंश्चतदस्त्राणिततोयजेत् इतिस्वर्णादिपात्रेचंदनादिनास्व
र्णादिशलाकयागुरूपदिष्टनविधिनायथोक्तंयंत्रंविधाय
बंदवेचतुर्विंशत्यक्षरांगायत्रींविलिख्यत्रिकोणेभूरादिव्या
हृतित्रयंलिखित्वाचतुष्कोणेमहः जनः तपः सत्यमितिचतु
ष्टयंविलिख्यशिरोमंत्रेणसंवेष्टयॐनमःसित्यैअआईईउ

गाय· ऊॠऋॡलृएऐओऔअंअः॥कखगघङचछजझञटठडढणतथदधंनपफबभंमयरलवशषसहक्षत्रज्ञेति स
६६ बिंदुकान्मातृकावर्णान्मूर्वादिप्रादक्षिण्येनवीथ्यंतरालेच
यंविलिखेत् इतियंत्रंनिर्मायमूलेनपुष्पंदत्वापुरतःस्थाप
येदितियंत्रोद्धारः॥ ॥अथार्घ्यस्थापनंकुर्यात् ततःपूर्वोक्त
विधिनात्माग्रतःकिंचिद्वामभागमवलंब्यसामान्यार्घ्यंस्थाप ६६
येत् ततःस्ववामभागचक्रमस्यदक्षिणेसामान्यार्घ्यजलेने

121/1971

वचतुरस्रषट्कोणदलत्रिकोणात्मकंमंडलंमत्स्यमुद्रयानि
र्मायॐश्रीमद्गायत्रीदेवतायाअर्घ्योधारमंडलायनमः इ
तिपुष्पाक्षतैःसंपूज्यतस्यांगानिपूजयेत् तद्यथा आग्नेय०
हृदयाय०नैर्ऋत्यशिरसेस्वाहा·वायव्येशिखायैवषट् ईशा
न्येकवचायहुं मध्येनेत्रत्रयायवौषट् नमश्तिमंडलंपूज
यित्वामूलविद्ययात्रिपादिकांप्रक्षाल्यतत्रनिधायपूजयेत्
ॐसंवर्द्धिमंडलायदशकलात्मनेगायत्र्यार्घ्यपात्रायनमः

तिसंपूज्यक्षकाराद्यकारांतंविलोमंस्वाहावसानंमातृकांज
पन्तदशक्तौकेवलंगायत्रीविरुच्चरन् अर्घ्यपात्रंपूरयेत्
ततॐउंसोममंडलायषोडशकलात्मनेश्रीमद्गायत्र्यार्घ्यामृ
तायनमइतिअर्घ्यजलंसंपूज्यगंगेचेतितीर्थमंत्रेणांकुशमुद्र
यातत्रतीर्थान्यावाह्यशिरसायेवषडितिगालिनीमुद्रांप्रदर्श्यगं
धाष्टकेनलोहितंपुष्पंनिक्षिप्यधेनुमुद्रयामृतीकृत्यगायत्र्याम ६७
हामुद्रयापरमीकुर्यात् तत्रगंधाष्टकमुक्तंवसिष्ठसंहितायां।।

श्रीखंडंगोरोचनंचंद्रमांसीकुंकुमकेसरे कस्तूर्युशीरमलयं
गंधाष्टकमुदाहृतं ततस्तत्रार्घ्यजलेनिजेष्टदेवतांध्यात्वाष
डंगन्यासेवसकलीकृत्य अस्त्रमंत्रेणाछोटिकाभिर्दशादि
ग्बंधनंकुर्यात् नेत्रमंत्रेणानिरीक्ष्यशंखमुद्रयावष्टभ्ययोनि
मुद्रयादीप्यमूलमुच्चार्यश्रीमदाराध्यदेवतायैगायत्र्यैनम
इतिगंधपुष्पाक्षतैर्देवीपूजयित्वागंधपुष्पधूपदीपान्नयाश
क्तिनिवेदयेत् ततस्तदुपरिमूलमंत्रमष्टधाजपित्वामत्स्य

123
1971

गाय० मुद्रयाच्छादयेदितिविशेषार्घ्यविधिः ततःसामान्यार्घ्यज
६८ लेविशेषार्घ्यजलबिंदुंनिक्षिपेत् ततोदक्षिणेप्रोक्षणीपा
त्रंस्थापयित्वाजलेनापूर्यतत्रविशेषार्घ्यजलबिंदुंनिक्षि
प्यतेनोदकेनमूलमुच्चार्यआत्मतत्वात्मनेनमः विद्या
तत्वात्मनेनमः शिवतत्वात्मनेनमइत्यभिर्मंत्रैः स्वशरी
रंत्रिःप्रोक्ष्यगायत्र्यात्मानंपूजोपकरणंचाभ्युक्ष्य० एतद् ६८
र्घ्यपात्रंपूजापवर्गपर्यंतंनचालयेदिति अर्घ्यस्थापनविधिः

अथात्मपूजा।। ।।तत्रप्रोक्षणीजलान्वितपुष्पेणगाय 125/1971
त्रीमुच्चार्यमूलाधारेहृदयेभ्रूमध्येचसंपूज्यमूलादिब्रह्म
रंध्रांतंगायत्रीमरुंदंडायमानेतजोरूपांविभाव्यतत्तेजोग्नि
रेकीभूतमानंदघनंगुरुमंत्रदेवतानामभेदेनसावयवीकृ
तस्वशरीरंनिर्मलंमत्वागंधपुष्पधूपदीपैरात्मानंपूजयित्वा
अलंकारैर्भूषयित्वापुनःपीठन्यासक्रमेणतत्तत्स्थानेषुतत्त
न्नामभिर्मंत्रैःप्रोक्षणीयजलान्वितपुष्पैर्वाकेवलपुष्पादिना

गाय० मंडूकाधारादि स्वदेहेयोगपीठंपूजयित्वातत्रगायत्रींध्यात्वा
६९ गायत्र्यासंपूज्यगायत्रीमुच्चार्यउत्तमांगेहृदयेमूलाधारेप
हृदयेसर्वांगेचेतिपंचसुस्थानेषुपंचपुष्पांजलिंक्षिपेत् ततो
अंतर्यागपुरःसरंऋष्यादिन्यासपूर्वकंगायत्रीरूपमात्मा
नंध्यायन्यथाशक्तिजपित्वासमर्पयेत् ततोनुज्ञांगृही
त्वाभोगायत्रीदर्शित्वामावाह्यपीठेपूजयामि अथयोग ६९
पीठपूजा तत्रपूर्वनिर्मितयथोचितगायत्रीयंत्रमध्यर्घो

दकेनसंप्रोक्ष्यतत्रैवसर्वाधक्त्वादारभ्यउपर्युपरिपूजयेत्
तद्यथा ॐमंडूकाधारायनमः कालाग्निरुद्रायनमः मूल
प्रकृत्यै० आधारशक्तये० कूर्माय० अनंताय० वराहाय०
पृथिव्यै० अमृतार्णवाय० रत्नद्वीपाय० स्वर्णपर्वताय० क
ल्पोद्यानाय० नानारत्नमयभूमिकायै० मणिमंडपाय०
कल्पवृक्षाय० रत्नवेदिकायै० रत्नसिंहासनाय० धर्माय०
ज्ञानाय० वैराग्याय० ऐश्वर्याय० अधर्माय० अज्ञानाय०

127/1971

गाय० ७०

अवैराग्याय० अनैश्वर्याय० शोषाय० पद्माय० आनंदकं
दाय० संविन्नालाय० सर्वतत्वात्मने योगपंकजाय० प्रकृ
तिमय पत्रेभ्यो० विकृतिमयकेसरेभ्यो० पंचाशद्वर्णबीजा
ढ्यकर्णिकायै० अंदादशकलात्मने सूर्यमंडलाय० उंषोड
शकलात्मने सोममंडलाय० मंदशकलात्मने वह्निमंडला
य० संसत्वाय० रंरजसे० तंतमसे० आंआत्मने० अंअंतरा
त्मने० पंपरमात्मने० ह्रींज्ञानात्मने० केसरमुत्रिकोणब्रह्मा

७०

129
1971

प्यै० रुद्राप्यै० वैष्णव्यै० षट्कोणेषु० हृदयादि० शिरसे
स्वाहेत्यादि० अष्टदळेषु० ध्रुवाय० अध्वराय० सोमाय०
अह्नो० अनिलाय० अनळा० प्रत्यूषसे० प्रभावसे० दीप्तासू
क्ष्माजयाभद्राविभूत्या विमलातथा अमोघाविद्युताचेति
मध्यश्रीसर्वतोमुखी द्वितीयवृत्तांतराळे कल्पितैकादशा
दळेषु० वीरभद्राय० शंभवे० गिरीशाय० अजैकपादे० अ
हिर्बुध्न्या० पिनाकिने० अपराजिताय० भुवनाधीश्वराय०

गाय० ७१ कपालिने० स्थापवे० भगाय० ११ द्वितीयांतरार्के देव्यग्रा
दिप्रादक्षिण्येन धात्रे० अर्यम्णे० मित्राय० वरुणाय० ईशा
नाय० भगाय० इंद्राय० विवस्वते० पूष्णे० पर्जन्याय० त्वष्टे०
विष्णवे० मध्येवैंदवे गायत्रीमुच्चार्यब्रह्मविष्णुशिवायगा
यत्र्यात्मनेसोरायेयोगपीठासनायनमः इतिऊर्ध्वपुष्पंद्
त्वातदुपरिश्रीगायत्रीमूर्तयेनमः तदुपरिध्यानोक्तांमूर्ति ७१
परिकल्प्यपुष्पंनिक्षिपेदितियोगपीठपूजा० ततः इंद्राय०

131
1971

अग्नये० यमाय० निर्ऋते० वरुणाय० वायवे० कुबेराय०
ईशानाय० वज्राय० शक्तये० दंडाय० खड्गाय० पाशाय०
अंकुशाय० गदायै० त्रिशूलाय० इतिपूजयेत् अथपाद्यार्घ्यो
चमनीयमधुपर्कार्थंपात्रचतुष्टयंपुरतःस्थापयित्वासामा
न्यार्घ्यविधिनाश्रीमद्गायत्रीदेवतायाःपाद्यंसंधायामिनः॥
एवमर्घ्यमित्यादिमंत्रैस्तत्तद्द्रव्यैर्जलैश्चपूजयेत् तथाचोक्तं
विश्वामित्रसंहितायां पीठपूजाविधानेनपीठंसंपूज्यपूर्ववत्

त् पाद्यार्घ्याचमनीयार्थंमधुपर्कार्थमप्यथ पात्रापया
धारयुक्तानिस्वर्णादिरचितानिच स्थापयेत्पुरतस्तानि
पूरयेच्छास्त्रवर्त्मना उशीरश्वेतचंदनंचैवयववव्रीहितिलान
पि आज्यंसिद्धार्थपुष्पाणिक्षिपेदर्घ्यस्यपात्रके माक्षिकं
शर्करासर्पिर्दधिक्षीरयुतंतथा मधुपर्कंकल्पयित्वाप्रद
द्याद्विधिपूर्वकं वसिष्ठसंहितायां पाद्यंश्यामाकदूर्वाङ्ग ७२
विष्णुक्रांताजलैस्मृ 'ता॥अर्घ्यपुष्पाक्षतयवकुशाग्रतिल

सर्षपैः गंधदूर्वाजलैःप्रोक्तंततश्चाचमनीयकं जातीफ
लंचकंकोलंलवंगंसजलंत्विदं आज्यंदधिमधून्मिश्रंमधु
पर्कःसमीरितः तदेतयोर्विकल्पेवक्तृवसिष्ठसंहितोक्ता
न्येवाश्नीतुपूर्वोक्तानिश्चत्यंताशनीतु एकस्मिन्नथवा
पात्रेपाद्यादीनिप्रकल्पयेत् सर्वोपचारवस्तूनांमभावाद्भाव
येद्धियेतिज्ञेयं एवंमासाद्यपात्राणितत्रपीठंनिधायच मूले
नमूर्तिंसंस्थाप्यध्यात्वादेवींयथोचितां आवाह्यपूजयेत्तस्यां

133
1971

गाय॰ परिवारगणैःसह ततःपंचायतनक्रमाच्चैतद्देव्याःपीठस्य
७२ नैर्ऋत्यादिकोणचतुष्टयेगणपत्यादिचतुरोदेवान्देव्याःपौरु
षविभूतिरूपान्तत्तत्स्थानेषुपृथक्पृथक्पूजयित्वामध्ये
यंत्रराजेमहादेवींगायत्रीपूजयेत् तथाचोक्तं नैर्ऋत्येगण
नाथंचसूर्यंवायव्यकोणके ईशान्येविष्णुमीशानमाग्नेयेश
क्तिपूजने शाक्तिस्तुगायत्र्यैव अतआहविश्वामित्रः सर्वेषा ७२
क्तांद्विजातीनांनरोवानचवैष्णवाः ब्रह्मविद्यामुपासीतगाय

135
1971

त्रींवेदमातरमिति तत्र यष्टुरभिमुखोदेवादेवाभिमुखवेतो
दिशाप्राच्यादिरहितोज्ञेयाःपूजाहोमादिकर्मसु इत्यनुसा
रात्मादक्षिण्येनपूर्वादिकंकल्पयित्वानैर्ऋत्यादिकंज्ञात्वात
दारभ्यपूजयेदिति सर्वत्र तद्यथा प्रथमंनैर्ऋत्येगणपतिं
पूजयेत् एकदंतायविद्महेवक्रतुंडायधीमहि तन्नोदंतिः
प्रचोदयात् वायव्ये आदित्यायविद्महेसहस्रकरायधीम
हि तन्नःसूर्यप्रचोदयात् ईशान्ये नारायणायविद्महेस

गाय. ७४ वासुदेवायधीमहि तन्नोविष्णुःप्रचोदयात् आग्नेय तसु
रुषायविद्महेमहादेवायधीमहि।।तन्नोरुद्रःप्रचोदयात् इ
तितन्नत्स्थानेषुपूजयेत् मध्येश्रीदेवीगायत्रीसांगांसपरिवा
रांसवाहनांसालंकारांसायुधांब्रह्मविष्णुरुद्ररूपांपूजयेत्
तद्यथा प्राणायामत्रयंकृत्वाऋष्यादिकरषडंगन्यासंविधाय
प्रणवेनकराभ्यांपुष्पांजलिमादायमात्कांमोजकत्वेनकल्प ७४
यित्वा पूर्ववद्रूपांभगवंतीत्दिध्यात्वामानसोपचारैर्यथावि

धिपूजयित्वातत्रैवतेजोरूपांनीत्वातस्मात्तेजसोत्द्द
यात्सुषुम्नानाडीमार्गेणब्रह्मरंध्रात् वामनासारंध्रेणवा
युमापूर्यकुंभयित्वादक्षिणनाड्यासूर्यमार्गेणकरस्थपु
ष्पांजलौतत्तेजोनिःसार्यदीपाद्दीपांतरगंतमिवनिर्गतंनि
त्यानंदगुणोदयंदेवीतेजोमूलमुच्चार्यसांगेसपरिवारेभग
वतिश्रीमत्सावित्रिब्रह्मवादिनिश्रीदेवीगायत्री एत्यहिद
विमद्धस्तपाद्युकाभ्यांदयानिधे आसनंकल्पयामीदमास्य

137
1971

तांकृपयांत्रिवे इत्यनेनानीयप्रणवेनब्रह्मरंध्रेनीत्वातस्यां
मूर्तौप्रवेश्यपद्ममुद्रांप्रदर्श्यसिंहासनमुद्रांप्रदर्शयेत् ततः
आवाहनसंस्थापनसंनिधीकरणसंनिरोधनसंमुखीकर
णसकलीकरणावगुंठनअमृतीकरणपरमीकरणानी
तिनवसंस्कारांतन्नन्मुद्राभिःकुर्यात् तद्यथा गायत्रीमुच्चा
र्यभगवतिश्रीमद्गायत्रीइहागच्छइहागच्छेति अनामिकाद्व ७५
यमूलार्पितांगुष्ठद्वयकोर्ध्वाजल्यधःकरणरूपयावाहन्या

मुद्रयावाह्य॥ १ ॥तथैवतिष्ठतिष्ठेति अधोमुखरूपया
संस्थापिन्यासंस्थाप्य॥ २ ॥तद्दयमंत्रमुच्चार्यभगवती
श्रीमद्देवीगायत्रीइहसंनिधेहि॥ ३ ॥इत्यकछ्रितांगुष्ठमु
ष्टिद्वयसंयोगरूपयासंनिधायन्यामुद्रयासंनिधीकृत्य
४ ॥तथैवसंनिरुध्यस्वइत्यंतरंगुष्ठयासंनिरोधन्यामुद्र
यासंनिरोध्य॥ ५ ॥गायत्रीकवचमंत्रमुच्चार्यश्रीमद्देवीगा
यत्रीइहसंमुखीभव॥ ६ ॥इत्युन्नानमुष्टियुगलरूपया

संमुखीकरण्यामुद्रयासंमुखीकृत्य देवतांगेषउंगन्या
सेनसकलीकृत्या ७ ॥परितोभ्रामिताधोमुखतर्ज
न्येकवामकरमुष्टिरूपयावगुंठनमुद्रयाश्रीम० इहा
वगुंठिताभवइत्यवगुंठय ८ वमितिधेनुमुद्रयामृती
कृत्य ९ दशप्रणवसंयुक्तांगायत्रीमुच्चार्यमहामुद्र
यापरमीकुर्यात् १० इतिनवसंस्काराः आवाहनादि ७६
हीननकृतापूजानिरर्थका विपरीतफलंदद्यादभक्त्या

141
1971

चार्चनंयथा ततःगायत्र्यामूर्तेःप्राणप्रतिष्ठांकुर्यात्
ॐ आंह्रींक्रोंयंरंलंवंशंषंसंहंळंक्षंहंसः सोहंश्रीगा
यत्र्याः प्राणइहप्राणाः आमित्यादिगायत्र्याजीवइह
स्थिताः ओंगायत्र्याः सर्वेंद्रियाणि० ओं० गायत्र्यावाङ्म
नश्चक्षुश्रोत्रघ्राणप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वा
हा इतिजपित्वादेवीमूर्तेःवक्षस्पृष्ट्वात्रिर्जपेत् ततोधि
कफलार्थंगायत्रीमंत्रसंपुटितैःअकारादिक्षकारांतैः

पुनः क्षकारादिअकारांतैः
गाय. पुनःअनुलोमेन अकारादिक्षांतैः मातृकावर्णैः साबिंदु
७७ रात्मवद्देवीं देहेव्यापयेत् तद्यथा ॐभूर्भुवःस्वः तत्सवितु॰
ॐ॰५॰क्षं॰५॰ अं॰५॰ॐभूर्भुवःस्वः तत्सवितु॰ ॐ गाय
त्रीपुटितांब्रह्मन्मातृकाक्षरमालिकां अनुलोमविलोमे
नयोजयेत्संप्रसंनधीः चिंतितार्थमवाप्नोतिइत्यृक्तंब्रह्म
णापुरा इतिवचनात् ततःपीठमध्येसर्वावयवभावेनदेवीं ७७
ध्यायन्योनिमुद्रांप्रदर्शयेत् ततोगायत्रीमंत्रमुच्चार्यश्री

143
1971

मद्देवीसावित्रीपुष्पंप्रतीछ स्वाहासांगायैसायुधायैसप
रिवारायैसर्वात्मिकायैभगवत्यैश्रीसावित्र्यैनमः इतिपु
ष्पांजलित्रयेणसंपूज्यस्वागताद्युपचारान्कुर्यात् ततुवि
श्वामित्रसंहितोक्तैः आसनंस्वागतंपाद्यंअर्घ्यमाचमनी
यकं मधुपर्कंतथास्नानवस्त्रालंकारणानिच गंधपुष्पधू
पदीपौनैवेद्यंसुखवासनं नमस्कारंस्तोऽशंचकल्पयेद्ध्व
तांप्रियं प्रयोजयेत्पूजनार्थंद्वादशैतानानुक्रमात् गंधा

दयोनिवेद्यांतापूजापंचोपकारिकी सपर्याःस्त्रिविधाःप्रो
क्तास्तासामेकांसमाश्रयेत् एवमेवसर्वपूजाकल्पेषुज्ञेयं।
तत्रसर्वत्रसंमतत्वात्षोडशोपचारक्रमोलिख्यते तत्रासनं
दत्तमेवमूलमुच्चार्यमूलंगायत्रीमंत्रः भगवतिदेवीगाय
त्रीस्वागतंतेऽत्रकुशलंप्रश्नंकृत्वामूलेनस्वागतमुद्रांप्रदर्श्य
०मू० चतुर्थ्यंतनाम्नापुष्पांजलिंक्षिपेत् श्रीमद्देवि० पुष्पं ७८
प्रतीच्छस्वाहा सांगायेसपरिवारायै० पाद्यंपरिकल्पयामिन

मः इत्यनेनमंत्रेणतत्पाद्यपात्रंपूर्वोक्तमामस्तकमुत्सृत्यदे
व्याःपादयोर्दद्यात् ततोमूलमुच्चार्यश्रीमद्गाय० इतिपुष्पांज
लिंक्षिपेत् ततःपुनरपिपूर्ववदर्घ्यंदेव्याःशिरसिदद्यात् मू०
आचमनीयंमुखेदद्यात् मधुपर्कंकल्पयामिस्वधेतिमुखे
स्नानवस्त्रंदत्वात्मदक्षिणेभागेकल्पितरत्नमंडपंनीत्वासिंहा
सनमुद्रांप्रदर्श्यपाद्यमर्घ्यंनिवेद्यमहाराजाभिषेकवन्म
नसैवदेवींस्नापयेत् आचमनंकेशोद्धर्तनंदद्यात् एतेअभ्यंत

गाय० रतोपचारागुरुमुखतोज्ञेयाः ततोवमितिवासंप्रोक्ष्य ॐ ब्रह्म
७९ हस्पतिदेवतोयवासस्सेनमःइतिसंपूज्यवासोदत्वापरिधाय्य
पुनस्तथैवाचमनीयंततोलंकारान्पूर्ववदभ्युक्ष्यॐविष्णुदै
वतेभ्योलंकारेभ्योनमःइतिपूजयित्वामूलंतेश्रीं० पुष्पंप्रतीछे
त्युत्सृज्ययथास्थानंमुकुटादिभिर्भूषयित्वापंचवाद्यपुरः
सरंपुनर्यागपीठंनयेत् अत्रसर्वत्रतत्तदुपचारद्रव्याणामभा ७९
छ्ये वाङ्मावयैतिज्ञेयं ततोवमितिधेनुमुद्रयाजलममृतीकृत्य॥

147
1971

मूलमुच्चार्यभगवति० नमस्तेदेवदेवेशिसर्वतृप्तिकरंपरं॥
अन्यानिवेदितंभुक्त्यंप्रकृतिछंसुशीतलं अमृतानंदसंपूर्णं
गृहाणजलमुत्तमं इत्यनेनमंत्रेणदेवीमुखेजलंदद्यात् ए
वमेवसर्वत्रेजलदानमः इतिसंपूज्य मूलंतेपुष्पंप्र० सौगा
येस० गंधंपरिकल्प० पूर्वोक्तगंधाष्टकेनगंधं० ततः ॐवन
स्पतिदेवतायपुष्पाय० पुष्पंपरिकल्पयामिवौषट् इत्यनेन
मुकुटोपरिऊर्ध्वमुखंपुष्पंदद्यात् मालांनमोदुर्गादेवतायै

गाय० मालायेनमइतिसंपूज्यपूर्ववद्दद्यात् ततःसांगारंधूपपा
८० त्रमानीयमूलेनाभ्युक्ष्यतत्रागुरुश्रीरगुग्गुलशर्करासंग
मचूर्णानिमधुघृतयुक्तानिनिक्षिप्यधेनुमुद्रयामृतीकृत्यगं
धवदेवतायधूपायनमः इतिसंपूज्यपूर्ववद्दद्यात् ॐगजध्व
निमंत्रमातःस्वाहा सांगा० धूपंप० अस्त्रायफट् इत्यस्त्रमं
त्रेणपूजितांघंटांवामकरेणवादयन् दक्षिणेनधूपपात्रमा ८०
दायधूपंविस्तारयन्वनस्पतिइत्यननीचैर्धूपंनिवेदयेत्॥

169
1971

देव्यावामतोवापुरतोवातत्पात्रंनिदध्यात् ततोवर्त्यकर्पूर
गर्भिण्यागुरुगर्भिण्यावासुरभिघृतपूरितंतैलपूरितंवाजा
ज्वल्यमानंदीपमानीय ॐविष्णुदेवतायघृतप्रदीपायनमः
मूलांतेसंबोध्य ॐ सुप्रकाशोमहादीपः सर्वत्रतिमिरापहः॥
सबाह्याभ्यंतरंज्यानिदेशोयंप्रतिगृह्यतां इत्यनेनपारावत
त्रमाकारंदेव्यानेत्रादिपादांतं पुनःपादादिदृष्टंतंत्रिर्दर्वीदीपं
प्रदर्शयेत् ततोघृतदीपंदेव्यादक्षिणेअन्यंवामेस्थापयेत् इत्त

गाय० ८१ मुपचारैर्देवीं पूजयित्वापूर्ववन्मूलमुच्चार्यपुष्पांजलिं निक्षिप्य संचिन्मयिपरेदेविगायत्रिब्रह्मरूपिणि आज्ञापयत्वंसावित्रिपरिवारार्चनायमे इत्यनेनदेव्याः शिरसिपुष्पांजलिंनिक्षिप्य आज्ञांगृहीत्वावरुणदेवतापूजयेत् तत्रादौयंत्रशिरसि ॐविश्वामित्रऋषयः ततःत्रिकोणे ॐप्रातःसंध्यायै० गायत्र्यै० मध्याह्नसंध्यायै सावित्र्यै० सायंसंध्यायै सरस्वत्यै० षट्कोणेअंगदेवताःपूजयेत् ॐतत्सवितु ८१

ब्रह्मात्मनेत्वदयायनमः इतिआग्नेये० वरेण्यंविष्ण्वात्मने शिरसेस्वाहा नैर्ऋत्ये भर्गोदेवस्यरुद्रात्मनेशिखायैवषट् वायव्ये० धीमहिसत्यात्मनेकवचायहुं ईशान्ये धियोयोनः ज्ञानात्मनेनेत्रत्रयायवौषट् अग्नतः प्रचोदयात् परब्रह्मात्मनेअस्त्रायफट् पश्चिमतः तुषारस्फटिकश्यामः कृष्णनीलरुणार्चिषः वरदाभयधारिण्यः प्रधानतनवस्त्रियः इत्यंगदेवताध्यात्वागंधपुष्पाक्षतान्वितांजलिनासंपूज्य गायत्री

151/1971

गाय० मुच्चार्य चतुर्वर्गफलंदेहि शरणागतवत्सले मन्त्र्यासमर्प
८२ येतुभ्यंआद्यमावरणार्चनंदेव्यैसमर्पयामीत्यवमुत्तरत्रापि।
ततःअष्टदलेपूर्ववत् ध्रुवाय० अध्वराय० सोमाय० अङ्गि०
अनिलाय० अनलाय० प्रत्यूषसे० प्रभासे० इतिद्वितीयं तद्व
हिः वीरभद्राय० शंभवे० गिरीशाय० अजैकपादे० अहिर्बुध्ना
य० पिनाकिने० अपराजिताय० भुवनाधीश्वराय० कपालिने० ८२
स्थाणवे० भगाय० इतितृतीयं ततः धात्रे० अर्यम्णे० मित्राय०

वरुणाय० ईशानाय० भगाय० इंद्राय० विवस्वते० पर्जन्या० 153/1971
त्वष्ट्रे० विष्णवे० इतिचतुर्थं इंद्राय० अग्नये० यमाय० निर्ऋ
ते० वरुणाय० वायवे० सोमानाय० ईशानाय० इतिपंचमं व
ज्राय० शक्तये० दंडाय० खड्गाय० पाशाय० अंकुशाय० गदा
यै० त्रिशूलाय० इतिषष्ठं एताःसर्वावरणदेवताःस्त्रीरूपाः
ध्यायेत् तद्यथा ॐ क्रौं इंद्राय ऐरावतवाहनायदेवाधिपत्त
येपीतवर्णायवज्रहस्तायदिव्यस्त्रीरूपायसांगायसपरिवा

गाय० रायनमः ॐ रां अग्नयेमेषवाहनायतेजोधिपतयेकपिलव
८३ र्णायशक्तिहस्तायदिव्यस्त्रीरूपाय० ॐ यां यमायमहिषवा
हनायप्रेताधिपतयेकृष्णदंडहस्तायदि० ॐ क्षां निर्ऋतयेप्रत
वाहनायखड्गहस्तायदिव्य० ॐ वां वरुणायमकरवाहनाय
यादोधिपतयेश्वेतवर्णायपाशहस्तायदिव्य० ॐ यां वायवेम्
गवाहनायप्राणाधिपतयेधूम्रवर्णायांकुशहस्तायदिव्य० ८३
ॐ सों सोमायतुरगवाहनायनाराधिपतयेनिर्मलायंगदाह्

155
197

स्तायदिव्य० ॐ हों ईशानायवृषभवाहनायरुद्राधिपतये
सितवर्णायशूलहस्तायदिव्यस्त्री० ईद्रेशानयोर्मध्ये ऊर्ध्वं ॐ
आं ब्रह्मणेहंसवाहनायप्रजाधिपतयेरक्तवर्णायपद्महस्ता
यदिव्य० निर्ऋतिवरुणयोर्मध्ये अधः ॐ श्रीं शेषायकूर्मवा
हनायनागाधिपतयेचक्रहस्तायस्वर्णवर्णायदिव्य० इति
दिक्पतीन्पूजयित्वापंचमावरणं० वज्रादिभिःषष्ठावरणंते
षाध्याने॥ ॥वज्राय० शक्तये० दंडाय० खड्गाय० पाशाय०

गाय० अंकुशाय०गदायै०त्रिशूलाय०चक्राय०पद्मा०वज्रः शक्तिः
८४ दंडः खड्गः पाशः अंकुशः गदा शूलः पद्मा चक्रं पीत भु
क्लांसिता काश विद्युदभासितासिताः इत्थमावरणानि
कोकनदपाटलाभावज्राद्याः परिकीर्तिताः इत्थमावरणा
निपूजयित्वापूर्ववन्मूलविद्ययागंधपुष्पाक्षतांजलित्रयेण
गायत्रीमाराध्यमूलेनैवपाद्यार्घ्याचमनीयानिदद्यात् ततु ८४
क्तंविश्वामित्रसंहितायां आदावंतेचपूजायानेमेच्चमूलवि

द्ययापाद्यार्घ्याचमनीयानिदद्यादेतानिदेशिकः ततोनैवे 157
द्यंनिवेदयेत् चर्व्यंपोष्यंलेह्यपेयचतुर्विधमन्नंषड्रसोपे 197
तंस्वर्णादिभाजनस्थंसमानीयपुरतश्चतुष्कोणमंडलोपरि
साधारंस्थापयित्वागायत्र्यानिरीक्ष्यप्रणवेनार्घ्योदकेन
संप्रोक्ष्यतेनैवपुष्पंनिक्षिपेत् ततोवमितिधेनुमुद्रयामृ
तीकृत्यगायत्र्यामहामुद्रयापरमीकुर्यात् ततोगायत्रीमु
च्चार्यश्रीमत्सावित्रीपुष्पंप्रतीच्छस्वाहा सांगायैसायुधायै

गाय० सबाहनायैसपरिवारायैसर्वात्मिकायैभगवत्यैश्रीमद्गा
८५ यत्र्यैनैवेद्यंपरिकल्पयामिनमः इतिमंत्रेणतत्रनैवेद्यज
लमर्पयेत् ततःॐ अमृतोपस्तरणमसिस्वाहेतिदेव्याह
स्तेजलेदद्यात् ततोवामकरेणाविकचोत्पलसंनिभांग्रा
समुद्रांप्रदर्श्यदक्षिणकरेणसमंत्रकंप्राणादिमुद्राःप्रदर्शी
येत् तद्यथाॐप्राणायस्वाहेत्यंगुष्ठतर्जनीमध्यमाभिः॥ ८५
ॐअपानायस्वाहा अंगुष्ठमध्यमानामिकाभिः॥ॐव्याना

यस्वाहेत्यंगुष्ठानामिकाकनिष्ठिकाभिः ॐउदानायस्वाहे
त्यंगुष्ठतर्जनीकनिष्ठिकाभिः॥ ॐसमानायस्वाहेतिसर्वा
भिः॥ततोनैवेद्यमुद्रांप्रदर्शयेत् प्रधानयाकरहृयेस्मरन्॥
अनामिकांनिजांप्रमनुंजपन्प्रदर्शयेत् ततोमूलविद्यामु
च्चार्य ॐभगवतिश्रीमत्सावित्री० सत्यत्रेसद्भविः सान्नं
विविधानेकभक्षणं निवेदयामितेदेवीसानुगायेजुषस्व
तत् इत्यनेनमंत्रेणतत्रनैवेद्यदेव्यग्रेपुष्पांजलिंक्षिपेत्॥

159/1971

गाय. ८५ ततश्चमुद्रांदर्शयित्वामूलमंत्रमष्टधाजपित्वामत्स्यमुद्र
याच्छादयेत् ततोअस्त्रेणादिग्बंधंविष्टयेत् ततोभुंजानांगा
यत्रीध्यायेत् ब्रह्मेशाद्यैः सरसमश्नितःसुपविष्टःसमेता
दिव्याभिः स्वैर्ललितललितैर्वेष्ट्यमानांगनाभिः नर्मक्री
डांप्रहसनपरांहासयंतीस्वभोक्तुर्भुंक्तेपात्रेकनकघटिते
षड्रसान्नंश्रीविधात्री॰ अत्रावसरेपूजांगहोमंकुर्यात्॥ ८५
तदुक्तंवसिष्ठसंहितायां॰ भोजनावसरेमंत्रीविश्वदेवं

समाचरेत् दक्षिणेस्थंडिलंकृत्वातत्राधायकृताग्नौ॥ 161/1971
संस्कृत्यविधिनाविद्वान्वैश्वदेवंसमाचरेत् तत्रसंपू
ज्यगंधाद्यैर्गायत्रीमुक्तविग्रहां मनव्याहृतिभिर्हुत्वा
गंधाद्यैःपुनरर्चयेत् देवतांयोजयेत्पीठमूर्तौविद्मिंहूं
विसर्जयेत् अवशिष्टंहविषाविकिरेत्परितोबलिं॥
देवतायाःपार्षदेभ्योगंधपुष्पाक्षतान्वितमिति॰ स्थंडि
ललक्षणमितितत्रैव नित्यंनैमित्तिकंहोमंस्थंडिलेवा

गाय० ८७ समाचरेत् हस्तमात्रेणतत्कुर्याद्दाक्षिकाग्निः सुशोभनं॥
अंगुलोत्सेधसंयुक्तं चतुरस्त्रसमंततः सर्पिषावातिलैर्वा
पिभक्तेनपायसेनवा जुहुयात्साधकश्रेष्ठः श्चतुर्विंशति
संख्यया विश्वेषांदेवानामयंवैश्वदेवस्येष्टदेवताहोमः॥
तस्यैवसर्वेषांतृप्तिहेतुत्वात् नदास्वात्मन्येवविसर्जनं
अग्निस्थापनादिकमग्रेवक्ष्यते ततःपार्षदबलिमंत्रः॥ ८७
येरौद्रारौद्रकर्मणोरौद्रस्थाननिवासिनः योगिन्योपुण्य

163
1971

रूपाश्चगणानामधिपाश्चये विघ्नभूतास्तथाचान्येदिग्वि
दिक्षुसमाश्रिताः तेसर्वेतृप्तिमनसः प्रतिगृह्णंत्विमंबलिं
॥गंधपुष्पाक्षतान्वितबलिमष्टदिक्षुविकिरेत् भूतानियां
नीहवसंतितानिबलिंगृहीत्वाविधिवत्सयुक्तं अन्यत्रवासंप
रिकल्पयंतुक्षमस्कृतान्यत्रनमोस्कृतेभ्यः इत्यनेनाष्टदिक्षु
विकिरेत् इतिभूतबलिः ततोगायत्र्याविभूतिनिलकंकृत्वा
पुनः पूजास्थानंगत्वाशक्त्याचैवास्मिन्नेवावसरेआशार्तिकंकु

गाय० र्यात् नोचेदारार्तिकमुद्रांप्रदर्शयेत् ततःसुतृप्तांदेवीं ध्यात्वा
८८ धेनुमुद्र्याजलममृतीकृत्य अमृतापिधानमसिस्वाहेतिमु
रवेजलंदद्यात् ततोगतसारंनैवेद्यंकिंचिदुध्धृत्य ॐ द्रौंतेज
श्चंडेश्वर्यैनमइतिदेव्युच्छिष्टभुंजेईशान्यांदद्यात् ततोनैवेद्य
मुध्धृत्यनैर्ऋत्यांदिशिधारये तत्स्थानंशोधयित्वाचदेवीमा
चामयेद्बुधः तत्रमुखादिप्रक्षालनंदंतधावनंपुनर्मुखप्रक्षा ८८
लनंहस्तास्यमार्जनंपुनराचमनीयंमुखवासंचदद्यात्॥

165
1971

ततोदेव्यैतांबूलंनिवेदयेत् ततःसुखोपविष्टासपरिवारांप्र
सन्नांदेवीं ध्यात्वाप्रसन्नांदेवीं ध्यात्वाप्रसन्नार्घ्यंगत्वागंध
पुष्पधूपदीपैःपूजयेदितिप्रसंनपूजाविधिः तथारार्तिकंद
द्यात् तत्रयथाविधिविहितमारार्तिकपात्रमानीयचक्र
मुद्रांप्रदर्श्यवामिति धेनुमुद्र्यामृतीकृत्यमूलेनाभ्यर्च्यम
स्त्रकमुच्चार्य ॐभगवतिश्रीमद्विगायत्रि० स
मस्तदेवताचक्रमुनिपितृगणामृत आरार्तिकंगृह्णेदंसा

गाय० वित्रीमसिद्धये इत्यनेनघंटावादनपूर्वकंपारावतभ्रमा
८९ कारंउच्चैर्देवींनीराजयेत् ततः छत्रचामरेदर्शयन्नानोपच
षणमथवसानेदद्यान्नृत्यगीतंचकारयेत् ततोमूलेनप्रा
णायामत्रयंकृत्वाऋष्यादिकरषडंगन्यासपूर्वकंजपमा
लामानीयकचित्पात्रेवामहस्तेवास्थापयित्वामूलमंत्रेणा
र्घोदकेनाभ्युक्ष्य ॐमांमालेमहामायेसर्वशक्तिस्वरूपि ८९
णी चतुर्वर्गत्वयिन्यस्तमस्मान्मेसिद्धिदाभव इत्यनेन

गंधपुष्पाभ्यांसंपूज्य ॐगं अविघ्नंकुरुमालेत्वंइतिमंत्रे 162
णदक्षिणहस्तेनादायस्वशिरसिगुरुकंठेमंत्रंहृदयेदेवी 1971
गायत्रीध्यायन् हृदयसमीपमालामानीयदक्षहस्त म
ध्यांगुलिमध्यपर्वणिसंस्थाप्यतदेकाग्रचित्तोगायत्र्या
श्चरणकालेचित्तवृत्तिःसन् गायत्र्यर्थंस्मरन्सहस्रंत्रिश
तमष्टोत्तरशतंवा प्रणवव्याहृतिपूर्वकंतत्सवितुरित्यृचं
चोतप्रणवंचोच्चार्ययथाविधिजपेत् करमालयावापुर

श्चरणेतुअक्षमालयैवनित्यंजपंकरेकुर्यान्नतुकाम्यंकदा
चन इतिवासिष्ठसंहितावचनात् अत्रापिकरमालयेतिक
श्चिदशक्तोज्ञेयमिति ततःसंख्यापूर्तौपुनःप्रणवमुच्चार्य
जपंसमाप्य ॐलंमालेसर्वदेवानांप्रीतिदाभुभदाममभु
भंकुरुष्वमेभद्रेयशोवीर्यंचसर्वदा ॐह्रींसिध्यैनमः इति
मालापंचाक्षर्याशिरसिसंस्थाप्यपुनःप्राणायामत्रयंकृत्वा ९०
ऋष्यादिकरषडंगन्यासपूर्वकंसावित्रीध्यात्वातस्यावाम

हस्तेवासिष्ठमतेदक्षिणहस्तेवार्घ्योदकजलेनजपंसमर्प्य 169/1971
ॐगुह्यातिगुह्यमंत्रेणजपंसमर्प्यदेव्यग्रेपुष्पांजलिंक्षिपेत्
ततॐह्रींसिध्यैनमइतिपंचाक्षरमालामंत्रेणापुनर्मालांसं
पूज्यरहसिस्थापयेदितिसर्वत्रपुरश्चरणेप्येवमेव नात्यु
च्चैर्नातिनीचंध्यात्वामंत्रीजपेन्मनुं बलिंदत्वानमस्कृत्यक्ष
मादेवीविसर्जयेत् अग्रतश्चतुरस्रवृत्तत्रिकोणमंडलं कृ
त्वातत्रगायत्रीध्यात्वामूलेनपुष्पाक्षतैःसंपूज्यचतुष्पदां

गाय० ९१ गायत्रीमुच्चार्ययथालाभान्नादिनानित्यंबलिंदद्यात् ततो घंटाचामरादिभिर्देवींपरितोषयेत् गायत्रीकवचंस्तोत्रंवामुदीरयेत् तांत्रिकपौराणिकवैदिकैस्तोत्रैर्मूलेनचस्तुत्वापुष्पांजलिंदत्वाष्टांगंप्रणमेत् तांत्रिकस्तोत्रमुक्तंवसिष्ठसंहितायां नमस्तेदेविगायत्रीसावित्रीत्रिपदेक्षरे अजरेअमरे मातस्त्राहिमांभवसागरात् नमस्तेसूर्यसंकाशेसूर्यासावित्रिकेमले ब्रह्मविद्येमहाविद्येवेदमातर्नमोस्तुते॥ २ ॥ ९१

अनंतकोटिब्रह्मांडव्यापिनीब्रह्मचारिणी नित्यानंदेमहामायेपरेज्ञानिनमोस्तुते॥ ३ ॥त्वंब्रह्मात्वंहरिःसाक्षाद्रुद्रस्त्वमिंद्रदेवता मित्रस्त्वंवरुणस्त्वंचत्वमग्निरश्विनौ भगः पूषार्यमामरुत्वांश्चऋषयोपिमुनीश्वराः पितरोनागयक्षाश्चगंधर्वाप्सरसांगनाः॥ ६ ॥रक्षोभूतपिशाचाश्चत्वमेवपरमेश्वरि ऋग्यजुःसामविद्याश्चअथर्वांगिरसानिच ६ त्वमेवसर्वशास्त्राणित्वमेवपूर्वसंहिताः पुरा

171/1971

गाय० णानिचतंत्राणिमहागममतानिच ७ त्वमेवपंचभूतानि
९२ तत्वानिजगदीश्वरि ब्राह्मीसरस्वतीसंध्यातुरीयात्वंमहेश्व
री ८ तत्सद्ब्रह्मस्वरूपात्वंकिंचित्सदसदात्मिका परात्प
रेशीगायत्रीनमस्तेमातरंबिके ९ चंद्रेकलात्मिकेनित्ये
कालरात्रिस्वधेस्वरे स्वाहाकारेग्निवल्केत्वांनमामिजगदी
श्वरी १० ॥नमोनमस्तेगायत्रीसावित्रीत्वांनमाम्यहं सर ९२
स्वतीनमस्कृत्यंतुरीयब्रह्मरूपिणि ११ अपराधसहस्त्रा

णित्वंसत्कर्मशतानिच मन्नोजतानिदेवेशित्वंक्षमस्व 173/197
दिनेदिने १२ ततःकृतांजलिरो० यद्दत्तंभक्तिमात्रेण
पत्रंपुष्पंफलंजलं निवेदितंचनैवेद्यंतद्गृहाणानुकंपया।
आवाहनंनजानामिनजानामित्वार्चनं पूजाभागंनजा
नामित्वगतिःपरमेश्वरि २ संध्यास्नानंजपंहोमंध्यानं
तर्पणमेवच नजानामिनजानामिसावित्रीत्वंगतिर्मनः।
कर्मणामनसावाचागायत्रीत्वंगतिर्मम अंतश्चारेणभूता

नांद्रष्ट्रीत्वंपरमेश्वरी॥ ४ ॥नाथेयोनिसहस्रेषुयेषुयेषु
व्रजाम्यहं तेषुतेष्वच्युताभक्तिरच्युतेस्तुसदात्वयि॥ ५॥
देवीदात्रीचभोक्त्रीचदेवीसर्वमिदंजगत् देवीजयतिसर्व
त्रयादेवीसाहमेवच यदक्षरपदभ्रष्टंमात्राहीनंचयद्भ
वेत् क्षंतुमर्हसिदेवेशिकस्यनिस्खलितंमनः॥ ७ ॥या
निकानिचपापानिजन्मांतरकृतानिच तानितानिविनश्यं ९३
तिप्रदक्षिणापदेपदे॥ ८ ॥इतिप्रदक्षिणीकृत्यप्रणम्यगु

रुंस्मृत्वापूजयित्वाप्रणम्य अर्घ्योदकेनात्मार्पणमंत्रेण 175
देव्यैस्वात्मानमर्पयेत् ॐइतःपूर्वप्राणबुद्धिदेहधर्माधि 1971
कारतोजाग्रत्स्वप्नसुषुप्त्यवस्थासुमनसावाचाहस्ताभ्यां
पद्भ्यामुदरेणशिश्नायत्स्मृतंयदुक्तंयत्कृतंतत्सर्वंब्रह्मा
र्पणंभवतुस्वाहा मांमदीयंचसर्वंश्रीमद्देव्यैगायत्र्यैस्वष्ट
देवतायैसमर्पयेत् ॐतत्सत् ततोमूलमंत्रेणयोनिमुद्र
याप्रणम्यदेवींविसर्जयेत् तत्रविशेषार्घ्यंचालयित्वामू

गाय० लेदेव्यैसमर्प्य तेनैवदेवीनीराज्यस्वस्थानेस्थापयित्वास
९४ पुष्पाभ्यांहस्ताभ्यांकृतांजलिर्देवीध्यायन् भगवतिदेवीगा
यत्रीक्षमस्वेतिवदन्गणपत्यादिचतुरोदेवान्देवीमूर्तौवि
लीनान्विभाव्यदेवीमूर्तिमपितेजोरूपान्विभावयेत् ततः
ॐ गच्छगच्छपरंस्थानंस्वस्थानेपरमेश्वरि यत्रब्रह्मादयो
देवानविदुःपरमंपदमित्यनेनसंहारमुद्रयानिर्माल्यमा ९४
कृष्याघ्रायतत्तेजस्तथैवसुषुम्नावर्मनास्वीयहृत्कमले

विसर्जयेत् ततोमूलेनप्राणायामत्रयंकृत्वा ॐ तिष्ठदे 127/1971
विपरेस्थानेस्वस्थानेपरमेश्वरि यत्रब्रह्मादयःसर्वसुरा
स्तिष्ठंतुमेत्तदि ततःऋष्यादिकरषडंगन्यासपूर्वकं हृ
दिमानसंदेवीं पूजयित्वातदात्मानमात्मानंभावयेत्॥
ततःईशान्यांचतुरस्रषट्कोणवृत्तत्रिकोणात्मकंमंडलं
विधायतत्स्थनैर्ऋत्यगणेशनिर्माल्येनॐ लंबोदराय
नमः वायव्येसूर्यनिर्माल्ये ॐतेजश्चंडायनमः ईशा

न्येविष्वक्सेनायनमः आग्नेयमहे
शानिर्माल्येन ॐचंडेश्वरायनमः मध्येदेवीनिर्माल्येनॐ
ॐतेजश्चंडेश्वर्यैनमः इतस्तत्तदुच्छिष्टभुजःपूजयेत् त
तोनिर्माल्यंमस्तकेधार्यंसर्वांगेचानुलेपनं नैवेद्यमुपभुं
जीतदत्वातद्भक्तिशालिने॥ ॥इतिविश्वामित्रसंहिताव
चनात् अवशिष्टचंदनेनमूलाभिमंत्रितेनपूर्वोक्तविधि ९५
नातिलकंकृत्वाअर्घ्योदकंकिंचित्पाश्यानिर्माल्यंतुशुचौदे

शेधारणीयंसदैवहि॥ ॥तथावसिष्ठः पुष्पादिकंसमा 179/1971
घ्रायशुचौदेशेक्षवाक्षिपेत् देवतात्मासुरंस्वछोविहरेद्दे
वताधिया॥ ॥इतिनित्यपूजाविधिः॥ ॥अत्रपुरश्च
रणायेतुइत्थंनित्यक्रमेणपूजांविधायपूर्ववद्गुर्वादिकं
ध्यात्वा गुरुमंत्रदेवतात्मानामेमंदलक्षणंविभाव्यदेवीरू
पमात्मानंस्मरन्पुरश्चरणीयंजपमाचरेत् तथाचोक्तंसं
हितात्रये गंधाद्यैर्मानसैरिष्ट्वाषडंगन्यासपूर्वकं ध्यात्वेष्ट

गाय० देवतारूपमात्मानं प्रजपेन्मनुं शास्त्रादृष्टेनविधिनाभ
९६ क्तिमान्स्थिरमानसः संख्यापूर्तैपुनः कुर्याद्दशादिप्रा
णसंयमन्लभतेभिमतांसिद्धिंचतुर्विंशतिलक्षतः जपतो
युतसंख्याकैरथवाचसहस्रकैः उत्तमंमध्यमंप्रोक्तंकनि
ष्ठंचपुरश्चरं लाघवेलाघवंकार्यंगौरवेगौरवंतथा यदि
कश्चिद्द्विजःश्रेष्ठःकृताचारोजितेंद्रियः तस्यसाविज्यादिमं ९६
त्राः फलत्येवनसंशयः यस्मिंश्चतिगदेनैवजपेत्संख्यावि

धीयते तत्रसर्वत्रमंत्राणांसंख्याद्विर्युगक्रमात् कल्पो
क्तैवरुतेसंख्यात्रेतायांद्विगुणाभवेत् द्वापरेत्रिगुणाप्रो
क्ताकलौसंख्याचतुर्गुणेति वैशंपायनासंहितावचनात्
षपनवतिलक्षसंख्यजपंपुरश्चरणं अथवातावत्संख्यअ
युतानिसहस्राणिवास्याइतिअवगम्यते तच्च जपार्चापूर्व
कोहोमस्तर्पणंचाभिषेचनं भूदेवभोजनंचैवप्रकारैषापु
रस्क्रिया इतिपंचांगतःसिद्धिंमंत्रीशीघ्रमवाप्नुयात् तेज

गाय० स्त्रीब्रह्मवर्चस्वीनिग्रहानुग्रहक्षमः भवेदचिरकालेनस
९७ त्यंजानीहिपार्वतीतीश्वरवाक्यंरुद्रयामले होमाशक्तौज
पंकुर्याद्धोमसंख्याचतुर्गुणं षड्गुणंचाष्टगुणितंयथा सं
ख्यंद्विजातयः स्वागतादिविनादेवीजपहोमार्चनिष्फलं
तस्मात्कुर्यात्प्रयत्नेनदेवीपूजनमादरात् ब्रह्मसंहिता
यां अशक्तावुक्तहोमस्तुजपस्तद्दिगुणोभवेत् इति त ९७
था सुतीर्थंप्रजपेन्मंत्रंपूर्वपापप्रशांतये श्रुद्देहायमंत्रो

183
1971

क्तः ततःसिद्धिंप्रयच्छति नाध्यातोनार्चितोमंत्रोगुरुभक्त्या
प्रसीदति नाजप्तःसिद्धिदानेछुर्नाकृतःफलदोभवेत्
पूजाध्यानंजपंहोमंतथाकर्मचतुष्टयं प्रत्यहंसाधकःकु
र्यात्स्वयंचेत्सिद्धिमिच्छति जपस्यांतेशिवंध्यायेध्यानस्यां
तेपुनर्जपेत् जपध्यानसमायुक्तः शीघ्रंसिध्यतिमंत्रवित्
कर्मणाप्रबलेनैवप्रतिबंधेविराधिना यदिसिद्धिंनलभते
द्विस्त्रिर्वापुनराचरेत् देवेनोपहतोत्यंतमैहिकानिनकार

गाय० ९८ येत् नापराधोस्यस्यकिंचित्सामुयाद्उपहास्यतां आमुष्मि
कंफलंतत्रभविष्यतिवरानने ब्रह्मलोकमवाप्नोतिब्रह्मणा
सहमोदते अथवाविष्णुलोकंचविष्णोःसायुज्यतांरजेत्॥
सूर्यस्यवाशिवःस्यापिचंद्रस्येंद्रस्यवापुनः यंयंकाममधी
येततंतमाप्नोतिनिश्चितं गायत्रीमंत्रजाप्येनसत्यंसत्यंन
संशयः नैक्ष्यादिनियताहारःसकृद्रात्रौविधीयते दिवा ९८
चैवजपंकुर्यात्सोरश्चरणिकोद्विजः पत्रावल्यांपलाशास्यमि

ताहारीभवेन्निशि कुशैर्विनिर्मितायांतुशाष्यायांवस्त्रमा
त्मनः सद्यःप्रक्षालितंदत्वा एकाकीनिर्भयःस्वयेत् एवंप्र
तिदिनंकुर्याद्यावत्संख्यानपूर्यते तदंतेमहतींपूजांकुर्या
द्विप्रांश्चतर्पयेत् गंधमाल्यांबरैश्चैवभक्षभोज्यैःसदक्षि
णैः दीनांधकृपणानार्थान्संतोष्यतद्दृष्टमानसः गोभू
हिरण्यवस्त्राद्यैःसंपूज्यगुरुमात्मनः मिष्टान्नंबंधुभिः
सार्द्धंभुंजीतोत्साहपूर्वकं महांतमुत्सवंकुर्यान्नाद्येनसाध

185
1971

कोत्तमः विधिनैवंजपंपूजाहोमादींश्चसमाचरेत् विधि
हीनेफलाभावस्तदुक्तंशिवशासने निर्ऋतिर्विधिहीनानां
फलंहंतिचकर्मणां निशाचाराहिपत्यंहि कुरुतेशंकरा धि२
ज्ञेयतिसंक्षेपः॥ ॥अत्रपूजात्रिविधा॥ ॥उत्तमम
ध्यमकनिष्ठभेदावुअग्निकार्येणहविषाभूषणैश्चसमन्वि
तं द्रव्यशुद्धिसमायुक्तंउत्तमंपूजनंस्मृतं अग्निकार्यवि ९९
हीनंतुकालदेशानुसारतः उपचारैर्युतंद्रव्यैर्मध्यमंपूजनं

182
1971

स्मृतं वस्त्रालंकारवस्तूनिवर्जयित्वाष्टथाग्विधं केवलंपु
ष्पयोगंतुकनिष्ठंपूजनंभवेदिति पूजाविस्तरतःकर्तुंयोनश
क्नोतिमानवः यदिवांगेंद्रवज्राद्यैः पूजयेदिष्टदेवतां अथ
वादेवतामात्मंध्यात्वासम्यक्प्रपूजयेत् अथवामानसींकु
र्यादात्मपूजामथापिवा अथवाकेवलांपूजांबात्मांकुर्याद्वि
चक्षणः अर्चामात्रेप्रशक्तश्चेद्द्याद्दर्चनसाधनं योदातुंना
तिशक्नोतिकुर्यादर्चनदर्चनं संपूज्यैवंजपंकुर्यान्नमंत्रंकेवलं

गाय० जपेत् पूर्वपूर्वस्यचाशक्तावुत्तरोत्तरमाचरेत् यद्येतदन्यथा
१०० कुर्यात्तदानिष्टफलंस्मृतं प्रभुःप्रथमकल्पस्ययानुकल्पेनव
र्तते नसांप्रदायिकंतस्यदुर्मतिर्विद्यतेफलं इतिविज्ञायसा
मर्थ्यमेकंपंथानमाचरेत् नैकंचयस्यविद्यतसोधोयांतिनसं
शयः इतिकृतपुरश्चरणः कल्पोक्तप्रयोगाधिकारीभवति
वत्सरादर्वाक्वा कसिद्धिर्जायते॥ ॥तदुक्तंशिवशासने॥ १००
एवंसंपूजयन्मंत्रीजपहोमादितत्परः ब्रह्मचर्यरतःशुत्यः शु

189
197

द्धदंतनवादिकः संस्मरन्त्सर्ववनिताःसंततंदेवताधिया स
र्वाभीष्टंलभेद्धीमान्मासैर्द्वादशभिध्रुवं सुविमलनरवदंत
पाणिपादोमुदितमना परदूषणेषुमौनी हरिहरकमलोद्भ
वामिभक्तोभवतिचरमीसरस्वतीनिवासः इतिनिगादित
मेतद्ब्रह्मरुद्रादिदेवैः सवित्रमनुविधानवेदतंत्रोक्तमाद्यं स
कलमपिचपूर्वैःकौशिकाद्यैःकृतंयत्समभिमतफलंतेनाशु
युःशीघ्रमेव वेदशास्त्रपुराणानामयमेवसुनिश्चयः गाय

गाय० व्याजपहोमादिविधिसर्वार्थसाधकः॥ ॥इतिश्रीशंक
१०१ राचार्यैःभगवद्भिःप्रकाशिता गायत्रीपद्धतिःशुद्धसंग्रदा
याद्विजन्मनां॥ ३ ॥हितायब्राह्मणानांचब्रह्मचर्यसमृ
द्धये लिखित्वापूजयेदेनांसोपिसिद्धिमवाप्नुयात्॥ ४ ॥
इतिश्रीमदाचार्यविरचितायसर्ववेदशास्त्रपुराणतत्रसं
मतागायत्रीपद्धतिःसमाप्ता॥ ॥यादृशंपुस्तकंदृष्ट्वातादृ १०१
शंलिखितंमया यदिशुद्धमशुद्धंवामदोषोनविद्यते॥१

गाय० शाके१७५६ जयनामसंवत्सरेउदगयनेग्रीष्मऋतौआ १९३/१९२१
१०२ षादमासेकृष्णपक्षेदशम्यांतिथौगुरुवासरेइदंपुस्तकंस
माप्तं ग्रंथसंख्या ११०० अकशरे॥ ॥शुभंभवतु॥

१०२

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

इतिगायत्रीपद्धतिः समाप्ता